There is no definite indication as to the date of the work Nor does the internal evidence furnish any further definite clue The fact that the *Paris'ista* has borrowed largely from other works on *dharmas'āstra* definitely pushes back its date to the centuries after the Christian era. The chapter dealing with *Svapna* (dreams) which is definitely borrowed from the *Matsyapurāna* will bring it further down to the Gupta times when the *purānas* took their present shape The earliest work which cites the *Paris'ista* is the *Mitāksarā* of Vijñānes'vara In fact, it is not too much to say that in several cases the *Mitāksarā*, in commenting on Yājñavalkya has taken the clue from the *Paris'ista* Illustrative instances can be found in p 6, under *sūtra* 7, p. 9, *sūtra* 14, p 27, *sūtras* 16 and 17, pp 32-33, *sūtras* 7-12, p 35, the last *sūtra* of the 7th chapter and the first *sūtra* of chapter 8, p 36, *sūtras* 3 and 4, p 39, *sūtras* 16 and 21 etc Commenting on Yājñavalkya III, 216, Vijñanesvara has quoted over half of a section of the *Parisista* The work had therefore attained to a position of authority by the time of Vijñānes'vara Neither Medhātithi nor Vis'varūpa has quoted this *Paris'ista* The argument of silence is at best only a partially correct view and cannot be pushed to the logical extreme Under the present state of our knowledge all that we can say is that about A D. 800 may be the latest date that can be assigned the *Gautama-dharma-sūtra-paris'ista.*

विषयानुक्रमणी

विषयाः	सूत्रसंख्या
प्रथमोऽध्यायः	
प्रतिज्ञा	१
भवप्राप्तिकारणानि	२
कर्मानुरूपशरीरग्रहणम्	३—५
सत्त्वादिगुणपरिपाकः	६—९
स्वर्गमार्गः	१०
देवयानपितृयाने	११—१४
द्वितीयोऽध्यायः	
सत्त्वशुध्या मोक्षप्राप्तिः	१
गृहस्थस्य मोक्षप्राप्त्युपायः	२
कर्मविपाकः	३
तत्राकामतो महापातकिना संसारप्राप्तिः	४—७
कामतो महापातकिना ससारप्राप्तिः	८—१२
तृतीयोऽध्यायः	
महापातकिनां कर्मविपाकः	१—६
पातकिनां कर्मविपाकः	७—३१
चतुर्थोऽध्यायः	
कर्मविपाकः	१—६६

विषयाः	सूत्रसंख्या
पञ्चमोऽध्यायः	
महापातकसमानि	१—४
उपपातकानि	५—४४
उपपातकाद्यावृत्तौ फलविशेषः . . .	४५—४७
षष्ठोऽध्यायः	
अतिपातकानि . . .	१
अनुपातकानि . .	२
जातिभ्रंशकराणि	३
संकरीकरणम्	४
अपात्रीकरणम्	५
मलिनीकरणम्	६
प्रकीर्णकम्	७
महापातकप्रायश्चित्तनिरूपणप्रतिज्ञा . .	८
ब्रह्महत्याप्रायश्चित्तम्	९—१७
सप्तमोऽध्यायः	
सुरापप्रायश्चित्तम्	१
एकादश मद्यानि	२
अकामतः सुरापाने प्रायश्चित्तान्तरम् . .	३—४
रेतोविण्मूत्रप्राशने प्रायश्चित्तम् . .	५
मद्यभाण्डस्थोदकपाने ,, . .	६—७
सुरापानसमे ,, . .	८
सुवर्णस्तेये ,, . .	९—११
कामाकामकृतपापाना प्रायश्चित्ते विशेषः . .	१२
त्रसरेण्वादिप्रमाणम् . .	१३—२०
सुवर्णपरिमितसुवर्णस्तेये महापातकत्वम् . .	२१

	विषयाः		सूत्रसंख्या
अष्टमोऽध्यायः			
गुरुतल्पे	प्रायश्चित्तम्	. .	१—३
गुरुतल्पसमे	,,	. .	४—७
धान्यादिहरणे	,,	. .	८—१०
ऋणानपाकरणे	,,	. .	११
अनाहिताग्निताया	,,	. .	११
लाक्षालवणादिविक्रये	,,	. .	१२—१३
निन्दितार्थोपजीवने	,,	. .	१४
भृतकाध्ययने	,,	. .	१५
जातिमात्रब्राह्मण्यादिगमने	,,	. .	१६—२१
स्वैरिणीगमने	,,	. .	२२—२३
बन्धकीगमने	,,	. .	२४—२६
विधवागमने व्रतस्थागमने च	,,	. .	२७
गर्भकरणे	,,	. .	२८
नवमोऽध्यायः			
स्वैरिशूद्रादिगमने	प्रायश्चित्तम्	. .	१—४
प्रतिलोमगमने	,,	. .	५—१०
भार्यामुखमैथुने निष्कृत्यभावः	.	. .	११
रजस्वलागमने	प्रायश्चित्तम	. .	१२—१३
श्वमार्जारादिवधे	,,	. .	१४
अस्थिमतामनस्थिमता च वधे	,,	. .	१५
आर्द्रद्रुमछेदने	,,	. .	१६—१७
काकादिभिर्दशे	,,	. .	१८—२०
दशमोऽध्यायः			
श्वादिदंष्टरजस्वलायाः प्रायश्चित्तम्		. .	१—३

विषयाः		सूत्रसंख्या
वेदोक्तकर्मपरित्यागे	प्रायश्चित्तम् .	४—५
कन्यादूषणे	,, .	६
आत्मार्थं पाकक्रियाया मद्यपस्त्रीनिषेवणे च	,, .	७
नारीणा विक्रये	,, .	८
ब्रह्मसूत्र विना भोजनादौ	,, .	९
रजस्वलयोरन्योन्यस्पर्शे	,, .	१०
तस्करराजभृत्यादीना	,, .	११
ब्रह्मोपजीविलक्षणम् .	. .	१२
देवलकादीना प्रायश्चित्तम्	.	१३
समुद्रयाने ब्राह्मणस्य ,,	. .	१४
असत्प्रतिग्रहे ,,	. .	१५—१६
सत्परिग्रहत्यागे ,,	. .	१७
अदत्तादाने कर्मविपाकः .	. .	१८
शाल्मलबहिर्वेदिपुरोडाशादिभक्षणे प्रायश्चित्तम्	.	१९

एकादशोऽध्यायः

अनिर्दशाहगवादिक्षीरपाने प्रायश्चित्तम	. .	१—२
अन्नस्य केशादिना दूषणे शुद्धिः .	. .	३—४
श्वाद्युच्छिष्टभक्षणे	प्रायश्चित्तम् .	५—१४
दीपोच्छिष्टादिभोजने	,, .	१५
पीतशेषपाने	,, .	१६—१७
अमेध्यादिस्पृष्टभक्षणे	,, .	१८—१९
कुत्सितान्नभोजने	,, .	२०
उत्थितादिभोजने	,, .	२१
एकपङ्क्तौ केनापि तत्त्यागे भोजने	,, .	२२—२३
शवादिदूषितकूपस्थजलपाने	,, .	२४—२५
चण्डालकूपभाण्डादिजलपाने	,, .	२६—३१

विषयाः	सूत्रसंख्या
द्वादशोऽध्यायः	
म्लेच्छादिपुष्करणीशौचाशौचनिर्णयपूर्वकं तज्जलपाने प्रायश्चित्तम्	१—४
रजकादिभाण्डस्थजलपाने प्रायश्चित्तम् .	५—६
अन्त्यजखानितकूपादौ स्नानकरणे ,, .	७—८
पर्युषितभोजने ,, .	९—१०
सक्त्वादीना निशि वर्जनम्; अवर्जने च ,, .	११—१२
अनाहुताद्यन्नभोजने ,, .	१३—१५
भिन्नभाजनादिषु भोजने ,, .	१६—१७
हस्तदत्तादिक्रियादुष्टाभोज्यभक्षणे ,, .	१८—१९
सुरापानसमानि	२०
अभोज्यान्नाः	२१
गणिकालक्षणम्, तदन्नभोजने च प्रायश्चित्तम् .	२२—२४
गणलक्षणम्	२५
त्रयोदशोऽध्यायः	
अभोज्यान्नाः	१
कदर्यलक्षणम्	२
षण्डलक्षणम्	३
मार्जारलक्षणम्	४
कुक्कुटलक्षणम्	५
पतितलक्षणम्	६
अपविद्धलक्षणम्	७
चण्डाललक्षणम्	८
एतेषामन्नभोजने प्रायश्चित्तम् . . .	९—१०
भ्रूणहालक्षणम्	११
पुनरभोज्यान्नाः	१२

विषयाः	सूत्रसङ्ख्या
बलात्कारेणाभोज्यभोजने प्रायश्चित्तम् . .	१३

चतुर्दशोऽध्यायः

अपुत्राद्यन्नभोजने प्रायश्चित्तम् .	१
अभोज्यानि, तद्भक्षणे च ,, .	२—५
नखच्युतघृतादेर्गोमांसतुल्यता, तद्भक्षणे च ,, .	६—८
हस्तदत्तभोजननिषेधः . . .	९
पीतशेषपानादौ प्रायश्चित्तम् . . .	१०—११
सुरापानसम जलम् . . .	१२
चण्डालादिस्पृष्टवस्त्रशुद्धिः . . .	१३—१६
चण्डालादिस्पृष्टसुवर्णादिशुद्धिः . . .	१७—२१
चण्डालादिस्पृष्टधान्यशुद्धिः . . .	२२—२३

पञ्चदशोऽध्यायः

गृहदाहे सति तत्रस्थधान्यशुद्धिः . .	१—२
शाणादिप्रमाणानि	३
अन्नशुद्धिः	४—५
घृतगुडादिशुद्धिः	६—७
बालाना शुद्धता	८
शूर्पवस्त्रादिस्पर्शे दोषः . . .	९—१०
दिवा मैथुने प्रायश्चित्तम् . .	११—१२
विप्रेण वादे तत्ताडनादौ च ,, . .	१३—१७
असंनिहितजलदेशादौ विण्मूत्रोत्सर्गे ,, . .	१८—१९
सूर्योदये स्वापे ,, . .	२०
नित्यकर्मलोपे ,, . .	२१
स्नातकव्रतलोपे ,, . .	२२
ऋतौ भार्याया अगमने ,, . .	२३

विषयाः	सूत्रसंख्या
कुलक्षयकर कर्म	२४

षोडशोऽध्यायः

अस्नातभोजनादौ प्रायश्चित्तम् . . .	१
पङ्क्तौ वैषम्यकरणे ,, . . .	२
अमेध्यगन्धाघ्राणे ,, . . .	३
कुनख्यादीना ,, . . .	४
पतितादिपङ्क्तिभोजने ,, . . .	५
नीलवस्त्रधारणे ,, . . .	६
नीलवस्त्रधारणनिषेधापवादः . . .	७
पालाशकाष्ठकृतपादुकादिधारणे प्रायश्चित्तम् . .	८
गुरुशिष्याद्यन्तरागमने ,, . .	९—१०
दुःस्वप्नारिष्टदर्शने ,, . .	११
दुःस्वप्ननिरूपणम्, तत्प्रायश्चित्तं च . .	१२—४९

सप्तदशोऽध्यायः

निषिद्धदेशगमने प्रायश्चित्तम् . .	१
स्वशकृद्वीक्षणे ,, . .	२
अग्नेः खट्वाद्यधःकरणे ,, . .	३
दर्भैः पादप्रमार्जने ,, . .	३
अनभिवाद्याभिवादने ,, . .	४—१०
निषिद्धकालेऽभ्यङ्गादौ ,, . .	११
अस्पृश्यस्पृष्टस्पर्शे ,, . .	१२—१३
यूपचण्डालादिस्पर्शे ,, . .	१४
देवलकस्पर्शनिषेधः . .	१५—१६
महापथिकलक्षणम् . . .	१७
उपस्पर्शननिमित्तानि . . .	१८

विषयाः	सूत्रसङ्ख्या
अष्टादशोऽध्यायः	
भुञ्जानस्यास्पृश्यस्पर्शे प्रायश्चित्तम् . .	१—५
असभाष्यसभाषणे ,, . .	६—७
विना यज्ञोपवीतेन भोजनादौ ,, . .	८—१०
इन्द्रचापादिदर्शने ,, . .	११
अप्सु स्वप्रतिबिम्बदर्शने ,, . .	१२
क्षुदादिषु ,, . .	१३
प्रकीर्णकप्रायश्चित्तोपसहारः . . .	१४
एकोनविंशोऽध्यायः	
अथ रहस्यप्रायश्चित्तानि	
तत्र बहिःसध्यया शुद्धिः . . .	१
'अग्नेर्मन्वे' इति सूक्तजपेन शुद्धि . .	२—३
सर्वपापक्षयकरा मन्त्राः . . .	४—७
गायत्रीजपमहिमा	८—१३
रुद्रैकादशिनीजपमहिमा . . .	१४—१७
विंशोऽध्यायः	
जपयज्ञप्रशसा	१—४
रुद्रजपप्रशसा	५—८
कृष्णाजिनदानप्रशंसा . . .	९
वेदाभ्यासः पञ्चधा	१०
सर्वपापहरणोपायः . . .	११

ERRATA

PAGE	LINE				
11	2	read	उच्चै स्वरः	for	उच्चै स्वर
12	2	,,	ब्रह्महा	,,	व्रह्महा
14	26	,,	cite	,,	cites
33	1	,,	स्तेनः स्तेयाद्	,,	स्तेनस्तेयाद्
36	20	,,	उशना	,,	उशना.
40	25	,,	,,	,,	,,
42	13	,,	°गच्छेल्लोहितदर्भैर्वेष्टयित्वा	,,	°गच्छेच्छरपत्रैर्वेष्टयित्वा
61	3	,,	°स्याश्रद्दधानस्य	,,	°स्याश्रद्धधानस्य
79	11	,,	cites	,,	cite

॥ श्रीरस्तु ॥

॥ गौतमधर्मसूत्रपरिशिष्टम् ॥

द्वितीयः प्रश्नः

प्रथमोऽध्यायः

[1]अथातो धर्मशेषान् व्याख्यास्यामः[2] ॥ १ ॥

[3]अन्त्यपक्षिस्थावरता दोषैर्मनोवाक्कायकर्मभिर्जीवोऽयं भवयोनिशतेषु प्रयाति[4] ॥ २ ॥

परद्रव्याणि मनसा ध्यायंस्तथानिष्टानि चिन्तयन् वितथाभिनिवेशी [5]जायतेऽन्त्यासु योनिषु[6] ॥ ३ ॥

[1] The manuscript अ begins with the following salutations श्रीगणेशाय नमः । श्रीदक्षिणामूर्तिगुरवे नम । हरिः ओम् ।

[2] Parallel quotations from the standard works on dharmaśāstra such as Manu, Yājñavalkya, Viṣṇu and Vasiṣṭha have been cited under each *sūtra*, wherever they have been traced Quotations from the *Mitākṣarā* of Vijñāneśvara, *Parāśara-Mādhavīya* and some of the minor *smṛtis* have also been added as they were found useful

[3] अदक्षिणस्थावरता—अ, अत्यन्तपक्षे स्थावरता—क

[4] cf, अन्त्यपक्षिस्थावरतां मनोवाक्कायकर्मजैः ।
दोषैः प्रयाति जीवोऽय भवयोनिशतेषु च ॥ याज्ञवल्क्यः, ३ १३१

[5] जायते आसुरयोनिषु—अ

[6] cf., परद्रव्याण्यभिध्यायस्तथानिष्टानि चिन्तयन् ।
वितथाभिनिवेशी च जायतेऽन्त्यासु योनिषु ॥ याज्ञवल्क्यः, ३, १३४,

पिशुनोऽनृतवादी [1]परुषोऽनिबद्धप्रलापी मृगपक्षिषु जायते[2] ॥ ४ ॥

अदत्तादाननिरतः [3]परदारगो हिंसकश्चाविधानेन [4]स्थावरेष्वभिजायते[5] ॥ ५ ॥

शौचवानात्मज्ञस्तपस्वी विजितेन्द्रियो दान्त [6]कर्मकृद्वेदविद्यावित् सात्विको देवयोनिता याति[7] ॥ ६ ॥

विषयेष्वारम्भी[8] व्यग्रोऽसत्कार्यनिरतो राजसो मनुष्येषु [9]मृतो जन्माधिगच्छति[10] ॥ ७ ॥

[1] पुरुषो—क

[2] cf., पुरुषोऽनृतवादी च पिशुन परुषस्तथा ।
अनिबद्धप्रलापी च मृगपक्षिषु जायते ॥ याज्ञवल्क्य ; ३, १३५.

[3] परदारणहिंसकश्चाविधानेन—क.

[4] स्थावरेऽभिजायते—क.

[5] cf , अदत्तादाननिरतः परदारोपसेवक ।
हिंसकश्चाविधानेन स्थावरेष्वभिजायते ॥ याज्ञवल्क्य , ३, १३६.
Compare sūtras 3 to 5 with *Manu*, XII, 5—7 and 9
परद्रव्येष्वभिध्यान मनसानिष्टचिन्तनम् ।
वितथाभिनिवेशश्च त्रिविध कर्म मानसम् ॥
पारुष्यमनृतं चैव पैशुन्यं चापि सर्वश ।
असंबद्धप्रलापश्च वाङ्मय स्याच्चतुर्विधम् ॥
अदत्तानामुपादानं हिंसा चैवाविधानत. ।
परदारोपसेवा च शारीरं त्रिविध स्मृतम् ॥
शरीरजै. कर्मदोषैर्याति स्थावरता नर· ।
वाचिकै· पक्षिमृगतां मानसैरन्त्यजातिताम् ॥

[6] कर्मकृद्वेदविद्यासात्विको—अ , कर्मकृत् सात्विको—क

[7] cf , आत्मज्ञ शौचवान् दान्तस्तपस्वी विजितेन्द्रिय· ।
धर्मकृद्वेदविद्यावित् सात्विको देवयोनिताम् ॥ याज्ञवल्क्य·, ३, १३७.

[8] विषयेष्वारम्भव्यग्रो—क

[9] मृगतो—अ.

[10] cf , असत्कार्यरतोऽधीर आरम्भी विषयी च यः ।
स राजसो मनुष्येषु मृतो जन्माधिगच्छति ॥ याज्ञवल्क्य , ३, १३८.

निद्रालुः क्रूरकृल्लुब्धो नास्तिको याचकः प्रमादवान् भिन्नवृत्तो भवेत्तामसस्तिर्यग्जन्तुषु[1] ॥ ८ ॥

रजसा तमसा चाविष्टश्चक्रवद्भ्राम्यतेऽसौ[2] ॥ ९ ॥

[3]इहाग्निहोत्रिणः स्वर्गं गच्छन्ति[4] ॥ १० ॥

ये च दानपरा सत्यव्रतपरायणा दम्भरहिताः सम्यक् [5]स्मार्तकर्मानुष्ठानपरा दयाक्षान्त्यनसूयाशौचानायासमङ्गलाकार्पण्यास्पृहैर्युक्तास्तथा [6]सगत्यागिनोऽर्चिरह शुक्लपक्षोत्तरायणसुरसद्मसूर्यवैद्युतेषु[7] [8]मुक्तिमार्गेषु विश्रा-

[1] cf., निद्रालु क्रूरकृल्लुब्धो नास्तिको याचकस्तथा ।
प्रमादवान् भिन्नवृत्तो भवेत्तिर्यक्षु तामसः ॥ याज्ञवल्क्यः, ३, १३९
Compare sūtras 6 to 8 with *Manu* XII, 31—33 and 40
वेदाभ्यासस्तपो दानं शौचमिन्द्रियनिग्रहः ।
धर्मक्रियात्मचिन्ता च सात्त्विकं गुणलक्षणम् ॥
आरम्भरुचिताधैर्यमसत्कार्यपरिग्रहः ।
विषयोपसेवा चाजस्रं राजसं गुणलक्षणम् ॥
लोभः स्वप्नोऽधृतिः क्रौर्यं नास्तिक्यं भिन्नवृत्तिता ।
याचिष्णुता प्रमादश्च तामसं गुणलक्षणम् ॥
देवत्वं सात्त्विका यान्ति मनुष्यत्वं च राजसाः ।
तिर्यक्त्वं तामसा नित्यमित्येषा त्रिविधा गतिः ॥

[2] cf., सत्त्वं रजस्तमश्चैव गुणास्तस्यैव कीर्तिताः ।
रजस्तमोभ्यामाविष्टश्चक्रवद्भ्राम्यते ह्यसौ ॥
रजसा तमसा चैव समाविष्टो भ्रमन्निह ।
भावैरनिष्टैः संयुक्तः संसारं प्रतिपद्यते ॥ याज्ञवल्क्यः, ३, १८२, १४०,

[3] भ्राम्यते चातिहाग्निहोत्रिणः—अ.

[4] cf., पितृयानोऽजवीथ्याश्च यदगस्त्यस्य चान्तरम् ।
तेनाग्निहोत्रिणो यान्ति स्वर्गकामा दिवं प्रति ॥ याज्ञवल्क्य., ३, १८४.

[5] स्मार्तानुष्ठानपरा दयाकाक्षानसूयाशौचानायास०—अ.

[6] सगत्यागिनोस्पृहाः शुक्ल०—अ, सगत्याच्यर्हः शुक्ल०—क

[7] ऋतुमासपक्षसूर्यवैद्युतेषु for सुरसद्मसूर्यवैद्युतेषु—क

[8] विविक्तमार्गेषु विश्रमिताः प्रस्थापिताः—अ.

म्य तैः प्रस्थापिताः परमपदं प्राप्नुवन्ति[1] ॥ ११ ॥

पुनरावृत्तिस्तेषामिह न विद्यते[2] ॥ १२ ॥

[3]धूमनिशाकृष्णपक्षदक्षिणायनपितृलोकचन्द्रमोऽभिमानिनीर्देवताः प्राप्य पुनरेव वायुवृष्टिजलभूमीः[4] प्राप्य व्रीह्याद्यन्नरूपेण शुक्रत्वमवाप्य[5] यज्ञदानतपोयुक्ताः संसारिणो योनिं व्रजन्ति[6] ॥ १३ ॥

अर्चिरादिधूमादिमार्गद्वयं यः प्रमत्तो न विजानात्यसौ भुजङ्गः[7] शलभः कृमिः कीटो वा भवेत्[8] ॥ १४ ॥

इति द्वितीयप्रश्ने प्रथमोऽध्यायः

---

[1] cf., ये च दानपरा सम्यगष्टाभिश्च गुणैर्युता ।
तेऽपि तेनैव मार्गेण सत्यव्रतपरायणा ॥
क्रमात्ते संभवन्त्यर्चिरह शुक्ल तथोत्तरम् ।
अयन देवलोकं च सवितारं सवैद्युतम् ॥
ततस्तान् पुरुषोऽभ्येत्य मानसो ब्रह्मलौकिकान् । याज्ञवल्क्य , ३, १८५, १९३-१९४.

[2] cf , करोति पुनरावृत्तिस्तेषामिह न विद्यते ॥ याज्ञवल्क्य , ३, १९४.

[3] धूमनिका कृष्ण०—अ

[4] वायुवृष्टिजलभूमि—अ.

[5] व्रीह्याद्यन्नरूपशुक्रत्वमवाप्य—अ.

[6] cf., यज्ञेन तपसा दानैर्ये हि स्वर्गजितो नराः ।
धूम निशा कृष्णपक्षं दक्षिणायनमेव च ॥
पितृलोकं चन्द्रमसं वायुं वृष्टि जल मही्म् ।
क्रमात्ते सभवन्तीह पुनरेव व्रजन्ति च ॥ याज्ञवल्क्य., ३,१९५-१९६.

[7] भुजङ्गशलभः—क.

[8] cf , एतयो न विजानाति मार्गद्वितयमात्मवान् ।
दन्दशूक. पतङ्गो वा भवेत् कीटोऽथवा कृमिः ॥ याज्ञवल्क्यः, ३, १९७.

द्वितीयोऽध्यायः

[1]अथवा वेदमभ्यसन् न्यस्तकर्मा वने वसन् [2]मितभुगयाचिताशी च परा सिद्धिमवाप्नुयात्[3] ॥ १ ॥

[4]अप्रतिग्रहेणोपार्जितधन सत्यवादी [5]श्राद्धानुष्ठाननिरत आत्मतत्त्वज्ञाननिष्ठोऽतिथिप्रियो[6] गृहस्थो मुक्ति प्राप्नुयात्[7] ॥ २ ॥

[8]महापातकिनो दारुणान् तामिस्रादिनरकान् प्राप्य तत्र प्रचुरदुःखमनुभूय पापशेषात् पुनरिह [9]संसारे दुःखबहुलश्वसृगालादितिर्यग्योनिषु भूयो भूयो जायन्ते[10] ॥ ३ ॥

ब्रह्महा मृगश्वसूकरोष्ट्रयोनिं[11] प्राप्नुयात्[12] ॥ ४ ॥

[1] अथ पङ्क्तौ वेदमभ्यसन्—अ, अथवा वेदमभ्यस्यन्—क.

[2] मितभुगयाचितां परा—अ.

[3] cf, अथवाप्यभ्यसन्वेद न्यस्तकर्मा वने वसन् ।
अयाचिताशी मितभुक् परा सिद्धिमवाप्नुयात् ॥ याज्ञवल्क्य, ३, २०४.
एवं संन्यस्य कर्माणि स्वकार्यपरमोऽस्पृहः ।
संन्यासेनापहत्यैन प्राप्नोति परमा गतिम् ॥ मनुः, ६, ९६.

[4] प्रतिग्रहेण for अप्रतिग्रहेण—क

[5] श्रद्धानुष्ठान०—अ.

[6] विधिप्रियो for अतिथिप्रियो—अ.

[7] cf., न्यायागतधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः ।
श्राद्धकृत्सत्यवादी च गृहस्थोऽपि हि मुच्यते ॥ याज्ञवल्क्य, ३, २०५

[8] महापातकिनोऽन्धतामिस्रादिनरकान्—अ

[9] समारे श्वसृगालादि०—क.

[10] cf, महापातकजान् घोरान्नरकान् प्राप्य दारुणान् ।
कर्मक्षयात्प्रजायन्ते महापातकिनस्त्विह ॥ याज्ञवल्क्य, ३, २०६
बहून् वर्षगणान् घोरान्नरकान् प्राप्य तत्क्षयात् ।
संसारान् प्रतिपद्यन्ते महापातकिनस्त्विमान् ॥ मनुः, १२, ५४.

[11] मृगश्वसूकरयोनि—क.

[12] cf, मृगश्वसूकरोष्ट्राणा ब्रह्महा योनिमृच्छति । याज्ञवल्क्यः, ३, २०७.

सुरापः [1]खरपुल्कसवेनयोनिम्[2] ॥ ५ ॥

स्वर्णहारी [3]कृमिकीटपतङ्गयोनिम्[4] ॥ ६ ॥

गुरुतल्पगस्तृणगुल्मलतात्वं चाकामतः[5] ॥ ७ ॥

कामतो दुःखबहुलयोनिषु[6] ॥ ८ ॥

ब्रह्महा श्वसूकरखरोष्ट्रगोजाविमृगपक्षिचण्डाल[7]पुल्कसानाम्[8] ॥ ९ ॥

सुरापो [9]विड्भुक्कृमिकीटपतङ्गपक्षिणां हिंस्राणां च सत्त्वानाम्[10] ॥ १० ॥

स्तेनस्तु विप्रो [11]लूताहिसरटानां सरीसृपाणां [12]तिरश्चामम्बुचारिणां हिंस्राणां च पिशाचानाम्[13] ॥ ११ ॥

[1] खरपुल्कसवेनयोनिम् —अ ; खलपुल्कसयवनयोनिम्—क.

[2] cf, खरपुल्कसवेणानां सुरापो नात्र संशयः । याज्ञवल्क्य, ३, २०७.

[3] कृमिकीटकपतङ्गयोनिम्—अ

[4] cf, कृमिकीटपतङ्गत्वं स्वर्णहारी समाप्नुयात् । याज्ञवल्क्य, ३, २०८

[5] cf, तृणगुल्मलतात्वं च बहुशो गुरुतल्पगः । याज्ञवल्क्यः, ३, २०८

[6] cf, 'एतच्चाकामकृतविषयम् । कामकारकृते त्वन्यास्वपि दुःखबहुलयोनिषु संसरन्ति' ॥ याज्ञवल्क्यस्मृतिव्याख्या मिताक्षरा, ३, २०८, पृष्ठम् ३६८.

[7] चाण्डाल for चण्डाल—अ.

[8] cf., श्वसूकरखरोष्ट्राणां गोजाविमृगपक्षिणाम् ।
चण्डालपुल्कसानां च ब्रह्महा योनिमृच्छति ॥ मनु, १२, ५५.

[9] विट्शूद्रक्रिमिकीटपतङ्गपक्षिणां—अ.

[10] cf., कृमिकीटपतङ्गानां विड्भुजां चैव पक्षिणाम् ।
हिंस्राणां चैव सत्वानां सुरापो ब्राह्मणो व्रजेत् ॥ मनु, १२, ५६

[11] लूताहिसरीसृपाणां—अ, लूतसरटानां सरीसृपाणां—क.

[12] तिरश्चाम्बुचारिणां—अ.

[13] cf., लूताहिसरटानां च तिरश्चां चाम्बुचारिणाम् ।
हिंस्राणां च पिशाचानां स्तेनो विप्रः सहस्रशः ॥ मनुः, १२, ५७.

गुरुतल्पगस्तु गुल्मलताना क्रव्यादानां च [1]दंष्ट्रिणा क्रूरकर्मकृता [2]चैव संसरन्ति[3] ॥ १२ ॥

इति द्वितीयप्रश्ने द्वितीयोऽध्यायः

तृतीयोऽध्यायः

ब्रह्महा क्षयरोगी [4]स्यात् ॥ १ ॥

श्यावदन्तकः सुरापः ॥ २ ॥

कुनखी हेमहारी ॥ ३ ॥

दुश्चर्मा गुरुतल्पगः[5] ॥ ४ ॥

रौरवादिनरकेषु सूकरादियोनिषु च दारुणं दुःखमनुभूयानन्तरं दुरितशेषेण जननसमये क्षयरोगादियुक्ता भवन्ति ॥ ५ ॥

[1] दष्ट्राणा—अ.

[2] चैव संगतिः—अ.

[3] cf., तृणगुल्मलतात्वं च क्रव्यदा दष्ट्रिणामपि ।
क्रूरकर्मकृता चैव शतशो गुरुतल्पगः ॥ मनु, १२, ५८.

[4] स्यात्— omitted by अ.

[5] Compare sūtras 1 to 4 with the following
ब्रह्महा क्षयरोगी स्यात् सुरापः श्यावदन्तकः ।
हेमहारी तु कुनखी दुश्चर्मा गुरुतल्पगः ॥ याज्ञवल्क्यः, ३, २०९
सुवर्णचौरः कौनख्यं सुरापः श्यावदन्तताम् ।
ब्रह्महा क्षयरोगित्वं दौश्चर्म्यं गुरुतल्पगः ॥ मनु, ११, ४९.
ब्रह्महा यक्ष्मी । सुरापः श्यावदन्तकः । सुवर्णहारी कुनखी ।
गुरुतल्पगो दुश्चर्मा ॥ विष्णु, ४५, ३—६.

[1]दु:खप्रचुरेषु मानुषशरीरेषु संसरन्ति[2] ॥ ६ ॥

अन्नहर्ताऽजीर्णान्न:[3] ॥ ७ ॥

[4]पुस्तकहार्यननुज्ञाताध्यायी मूको भवति ॥ ८ ॥

धान्यमिश्र[5] षडङ्गुल स्यात् ॥ ९ ॥

पिशुनो [6]दुर्गन्धनामिक· ॥ १० ॥

[7]तैलहर्ता तैलपायी [8]कीटविशेष. ॥ ११ ॥

असद्दोषसंकीर्तनो दुर्गन्धवदन·[9] ॥ १२ ॥

[1] दु:खप्रचुरमानुषशरीरेषु—अ.

[2] Compare sūtras 5 and 6 with मिताक्षरा on याज्ञवल्क्य, III, 209 —"एवं रौरवादिनरकेषु श्वसूकरखरादियोनिषु च दारुण दु·खमनुभूयानन्तर दुरितशेषेण जननममय एव क्षयरोगादिलक्षणयुक्ता । प्रचुरेषु मानवशरीरेषु संसरन्ति"

[3] अन्नहर्ताजीर्णनदी—अ

[4] पुस्तकादिमहार्यननुज्ञातात्याशी मूको—अ.

[5] धान्यहर्ता—क

[6] दुर्गन्ध नास्तिक —क

[7] तिलहर्ता—क

[8] कफविशेषः—अ.

[9] Compare sūtras 7 to 12 with the following

अन्नहर्तामयावी स्यान्मूको वागपहारक· ॥
धान्यमिश्रोऽतिरिक्ताङ्ग. पिशुनः पूतिनासिक. ।
तैलहृत्तैलपायी स्यात्पूतिवक्त्रस्तु सूचक ॥ याज्ञवल्क्य, ३, २१०-२११

अन्नहर्ताऽऽमयावित्व मौक्य वागपहारक. ।
पिशुनः पौतिनासिक्यं सूचकः पूतिवक्त्रताम् ।
[धान्यचौरोऽङ्गहीनत्व]आतिरेक्यं तु मिश्रक ॥ मनुः, ११, ५१, ५०.
[मांसं गृध्रो वपां मद्गु:]तैलं तैलपकः खग ॥ मनु·, ११, १२, ६३.

अन्नापहारकस्त्वामयावी । वागपहारको मूकः । मिश्रचोरोऽतिरिक्ताङ्ग· । पूतिनासः पिशुन । तैल तैलपायिक । पूतिवक्त्र: सूचक. ॥ विष्णुः, ४५, ११-१२, १०, ७; ४४, २३, ४५, ८.

[1]एतच्च तिर्यक्त्वप्राप्त्यनन्तरं मानुषशरीरप्राप्तौ द्रष्टव्यम्[2] ॥ १३ ॥

यद्वा तद्वा परद्रव्यमपहृत्याहुतं [3]च हविर्जग्ध्वा तिर्यक्त्वं याति[4] ॥ १४ ॥

परस्य योषितं हृत्वा ब्रह्मस्वं[5] सुवर्णव्यतिरिक्तं हृत्वा बहु हिरण्यं प्रतिगृह्य चारण्ये निर्जले देशे ब्रह्मराक्षसः स्यात्[6] ॥ १५ ॥

पत्रशाकं हृत्वा मयूरः ॥ १६ ॥

शुभान् गन्धान् छुच्छुन्दरी नाम मूषिका जायते ॥ १७ ॥

धान्यहारी मूषको [7]भवति ॥ १८ ॥

यानमुष्ट्रः ॥ १९ ॥

फलं वानरः ॥ २० ॥

जलं [8]प्लवः ॥ २१ ॥

[1] प्रेतश्च तिर्यक्त्वं प्राप्यानन्तरं—अ.

[2] cf., एतच्च तिर्यक्त्वप्राप्त्युत्तरकाल मानुषशरीरप्राप्तौ द्रष्टव्यम् ।
"यद्वा तद्वा हवि·" इति मनुस्मरणात्—याज्ञ. मिता, ३, २१०-२११.
अथ नरकाभिभूतदु खाना तिर्यक्त्वमुत्तीर्णाना मनुष्येषु लक्षणानि भवन्ति । विष्णुः, ४५, १.

[3] च—omitted by अ.

[4] cf, यद्वा तद्वा परद्रव्यमपहृत्य बलान्नरः ।
अवश्यं याति तिर्यक्त्वं जग्ध्वा चैवाहुतं हवि· ॥
मनु, १२, ६८, विष्णुः, ४४, ४४.

[5] ब्रह्मस्वसुवर्णव्यतिरिक्त—अ.

[6] cf, परस्य योषित हृत्वा ब्रह्मस्वमपहृत्य च ।
अरण्ये निर्जले देशे भवति ब्रह्मराक्षस· ॥ याज्ञवल्क्य, ३, २१२
संयोगं पतितैर्गत्वा परस्यैव च योषितम् ।
अपहृत्य च विप्रस्वं भवति ब्रह्मराक्षस· ॥ मनु, १२, ६० ['विप्रस्व'—ब्राह्मणसुवर्णादन्यदपहृत्य—कुल्लूक·]

[7] भवति—omitted by अ.

[8] प्लवंगः—अ.

2

[1]क्षीरं काकः ॥ २२ ॥

गृहोपस्करमुसलादि हृत्वा सरटाख्यः कीटविशेषो भवेत्[2] ॥ २३ ॥

मधु हृत्वा [3]दंशः ॥ २४ ॥

मासं हृत्वा गृध्रः ॥ २५ ॥

गा हृत्वा [4]गोधाख्यः प्राणिविशेषः ॥ २६ ॥

[5]अग्निं पिकः[6] ॥ २७ ॥

[1] क्षीरकारो गृहोपस्कर०—क.

[2] Compare sūtras 16 to 23 with the following .

पत्रशाक शिखी हृत्वा गन्धान् छुच्छुन्दरी शुभान् ॥

मूषको धान्यहारी स्याद्यानमुष्ट्रः कपि फलम् ।

जलं प्लव: पय काको गृहकारी ह्युपस्करम् ॥ याज्ञवल्क्य ३, २१३-२१४.

'पत्रशाकं तु बर्हिणः' १२, ६५, 'छुच्छुन्दरि शुभान् गन्धान्' १२, ६५; 'धान्यं हृत्वा भवत्याखु.' १२, ६२, 'यानान्युष्ट्र' १२, ६७; 'फलमूलं तु मर्कट' १२, ६७; 'जलं प्लवः' १२, ६२, 'पय. काक·' १२, ६२; 'गृहकारी ह्युपस्करम्' १२, ६६—मनु·

पत्रशाकं बर्ही। छुच्छुन्दरिर्गन्धान्। आखुर्धान्यहारी। यानमुष्ट्रः। फलं पुष्पं वा मर्कट.। जलं हृत्वाभिप्लत्र:। पयः काक·। गृहकार्युपस्करम् ॥—विष्णुः, ४४, ३२, ३१, १४, ४२, ४०, १६, १८, ३६.

[3] दयालो—क.

[4] गोदाख्य:—अ.

[5] अन्नं पिक:—अ.

[6] Compare sūtras 24 to 27 with the following

मधु दंशः पलं गृध्रो गा गोधाग्निं बकस्तथा ॥ याज्ञ, ३, २१५.

'मधु दश' १२, ६२, 'मासं गृध्रः' १२, ६३; 'गोधा गाम्' १२, ६४; 'बको भवति हृत्वाग्निम्' १२, ६६—मनु·

मधु दंश.। मांसं गृध्र.। गोधा गाम्। अग्निं बकः॥ विष्णुः, ४४, १७, २१, २९, ३५

मनुयाज्ञवल्क्यविष्ण्वादय. 'बको भवति हृत्वाग्निम्' १२, ६६, 'अग्निं बकस्तथा' ३, २१५, 'अग्निं बकः' ४४, ३५, इत्यादिनाग्निहर्ता बकयोनिं प्राप्नोतीत्याहुः। अत्र तु

इक्ष्वादिरसं [1]सारमेयः ॥ २८ ॥

लवणहारी [2]चीर्याख्य उच्चैःस्वर कीटविशेष. ॥ २९ ॥

कास्यहारी हंसः[3] ॥ ३० ॥

अश्वं पङ्गुर्भवेत्[4] ॥ ३१ ॥

इति द्वितीयप्रश्ने तृतीयोऽध्यायः

कसञ्ज्ञककोशे 'अग्निं पिक·' इत्येव पाठो दृश्यते । असंज्ञककोशे 'अन्न पिकः' इति पाठः । अन्नहरणे च 'कृतान्न सेधा' 'अकृतान्नं शल्यक' ४४, ३३-३४, इत्येताभ्या सूत्राभ्यां जन्म विष्णुराह । 'श्वावित्कृतान्न विविधमकृतान्नं तु शल्यक·' इति च मनुः, १२, ६५. अस्यैव परिशिष्टस्य चतुर्थाध्याये—'क्षीरहारी बकः' ५८ इत्यनेन सूत्रेण क्षीरहरणे बक-योनिप्राप्ति. अत्रैवाध्याये 'क्षीरं काक·' २२ इत्यनेन क्षीरहरणे काकयोनिप्राप्तिश्च प्रतिपाद्यते । कोशान्तरलाभे समीचीनपाठप्राप्ति स्यादपि ।

[1] सारमेयी—क.

[2] चिल्याख्य—क.

[3] हसश्च पङ्गुर्भवेत्—अ

[4] Compare sūtras 28 to 31 with the following·
[श्वित्री वस्त्रं] श्वा रस तु चीरी लवणहारक । याज्ञ, ३, २१५
'यथा—कास्यहारी हंसः इति' 'यथा—पङ्गुतामश्वापहारक इति' याज्ञ. मिता., ३, २१६

'रस श्वा' १२, ६२; 'चीरीवाकस्तु लवणम्' १२, ६३; 'हंसः कास्यापहारी' १२, ६२—मनु..

रस श्वा । लवण चीरिवाक् । हंस. कांस्यापहारी । अश्वापहारकः पङ्गुः ॥ विष्णुः, ४४, १९, २४, १५; ४५, १४

चतुर्थोऽध्यायः

[1]ब्रह्महा कुष्ठी स्यात्[2] ॥ १ ॥

[3]तैजसापहारी [4]मण्डली ॥ २ ॥

देवब्राह्मणाक्रोशक. खलतिः[5] ॥ ३ ॥

गरदाग्निदावुन्मत्तौ[6] ॥ ४ ॥

[7]गुरुं प्रतिहन्तापस्मारी[8] ॥ ५ ॥

[9]गोघ्नश्चान्धः[10] ॥ ६ ॥

धर्मपत्नी मुक्त्वान्यत्र प्रवृत्तः [11]शब्दभेदी प्राणिविशेषः ॥ ७ ॥

[1] विज्ञानेश्वर attributes sūtras 1 to 22 to शङ्ख and 23 to 66 to गौतम (cf याज्ञवल्क्यमिताक्षरा p. 370-371). माधव cites sūtras 23 to 65 under गौतम (cf , पराशरमाधवीयम् , प्रायश्चित्तकाण्डम् , p. 514-515 and 518) वैद्यनाथ cites sūtras 1 to 22 under शङ्ख and 23 to 65 under वृद्धगौतम (cf., स्मृतिमुक्ताफलम् , प्रायश्चित्तकाण्डम् , p 861-862).

[2] cf , ततो मानुषता प्राप्य व्याधिभिस्तत्र पीड्यते ।
कुष्ठरोगेण घोरेण ब्रह्महत्या प्रयोजयेत् ॥ शिवधर्मोत्तरे, परा. मा.प्रा , पृ. ५०६.

[3] तेजसोऽपहारी—अ.

[4] मण्डल.—क.

[5] cf., देवब्राह्मणाक्रोशको मूकः । विष्णुः, ४५, १५.
गुरुस्वामिद्विजाक्रोश वेदनिन्दा तथैव च ।
कृत्वा (श्रुत्वा) भवति दुर्बुद्धिर्बधिरो वापि मानवः ॥
विष्णुधर्मोत्तरे, परा. मा. प्रा., पृ. ४९९.

[6] cf , उन्मत्तोऽग्निदः । लोलजिह्वो गरद ॥ विष्णु., ४५, १७, १६.

[7] गुरु स्वंकर्तापस्मारी—क. गुरुप्रतिहन्तापस्मारी—वैद्यनाथ, स्मृ मु., पृ. ८६१.

[8] cf., गुरोः प्रतिकूलोऽपस्मारी । विष्णु., ४५, १८, प्रतिकूलं गुरोर्यस्तु सोऽपस्मारी प्रजायते ॥ विष्णुधर्मोत्तरे, परा. मा. प्रा., पृ., ४९९

[9] गोघ्नश्चाण्डालः—क.

[10] cf., गोघ्नस्त्वन्धः । विष्णुः, ४५, १९.

[11] शब्दवेधी—विज्ञानेश्वर , याज्ञ. मिता., पृ. ३७० ; धर्मपत्नीमृतौ त्यक्त्वान्यत्र प्रवृत्तः शब्दवेधी—वैद्यनाथः, स्मृ. मु., पृ. ८६१.

[1]भगभक्षः कुण्डाशी ॥ ८ ॥

देवब्राह्मणस्वापहारी पाण्डुरोगी ॥ ९ ॥

[2]स्वापहारी काणः ॥ १० ॥

[3]स्त्रीपण्योपजीवी षण्ढः ॥ ११ ॥

[4]कौमारदारत्यागी दुर्भगः[5] ॥ १२ ॥

[6]मृष्टैकाशी वातगुल्मी[7] ॥ १३ ॥

अभक्ष्यभक्षको[8] गण्डमाली[9] ॥ १४ ॥

[1] भगभक्षः—omitted by क; विज्ञानेश्वर reads—'कुण्डाशी भगभक्षो देवब्रह्मस्वहारी (देवब्रह्मस्वहरः)। पाण्डुरोगी न्यासापहारी च काण' for sūtras 8, 9 and 10, याज्ञ मिता., पृ ३७०; कुण्डाशी दंशभक्षः—वैद्यनाथ, स्मृ. मु, पृ. ८६१; कुण्डाशी भगभक्तो देवब्राह्मणापहारी पाण्डुरोगी न्यासापहारी काण—मदनपारिजात, पृ. ७०१.

cf, भगभक्षस्तु कुण्डाशी [दीर्घरोगी च पीडक]—विष्णुधर्मोत्तरे, परा. मा प्रा., पृ. ४९९; कुण्डाशी भगास्यः—विष्णुः, ४५, २४ शङ्ख in परा मा प्रा, पृ. ६१७ reads गृध्रो देवद्रव्योपजीवकः.

[2] नासापहारी काणः—अ, न्यासापहारी काण—विज्ञानेश्वरवैद्यनाथौ, The reading स्वापहारी काण. found in क MS seems better as there is another sūtra 'न्यासापहार्यनपत्यः' ३७, in the same chapter

[3] स्त्रैण्योपजीवी—अ; स्त्रीमण्युपजीवी—क. स्त्रीवश्योपजीवः—वैद्यनाथ.

[4] कौमारीदारत्यागी—अ.

[5] cf., ये त्यजन्ति स्वका भार्या मूढाः पण्डितमानिन।
दुष्कर्मा दुर्भगश्चैव दरिद्र सप्रजायते ॥ स्कान्दे, रेवाखण्डे, परा. मा प्रा., पृ. ४९८.

[6] अमृष्टाशी गुल्मी—क; मिष्टैकाशी—विज्ञानेश्वरः.

[7] cf., मृष्टाश्येकाकी वातगुल्मी। विष्णु., ४५, २७.
मिष्टाश्येको महाभाग वातगुल्मी प्रजायते ॥ विष्णुधर्मोत्तरे, परा. मा. प्रा, पृ. ४९९

[8] अभक्ष्यभक्षी—अ.

[9] cf, 'अभक्ष्यभक्षी गण्डमाली' शिवधर्मोत्तरे, परा. मा. प्रा., पृ. ५११.

ब्राह्मणीगामी [1]निर्बीजी ॥ १५ ॥

क्रूरकर्मा वामनः ॥ १६ ॥

वस्त्रापहारी पतङ्ग· [2]श्वित्री च[3] ॥ १७ ॥

शय्यापहारी [4]क्षपणक· ॥ १८ ॥

[5]शङ्खशुक्त्यपहारी [6]कपाली ॥ १९ ॥

दीपापहारी कौशिक·[7] ॥ २० ॥

[8]मित्रध्रुक् क्षयी ॥ २१ ॥

मातापित्रोराक्रोशकः [9]करभोदरः ॥ २२ ॥

[10]अनृतवाद्यल्पबलः[11] मुहुर्मुहुः संलग्नवाक् ॥ २३ ॥

[1] दुर्बीजी—अ

[2] श्वस्त्री—अ, श्वित्री च—omitted by वैद्यनाथ and मदनपारिजात.

[3] cf, वस्त्रापहारक. श्वित्री । विष्णु, ४५, १३; 'श्वित्री वस्त्रम्' याज्ञवल्क्य, ३, २१५; 'वस्त्रापहारी श्वित्री स्यात्' विष्णुधर्मोत्तरे, परा मा. प्रा., पृ. ५१६.

[4] रुणक —अ.

[5] शङ्खशुक्त्योरपहारी—अ.

[6] कपाली—omitted by क

[7] cf, [गोघ्नस्त्वन्ध ।] दीपापहारकश्च ॥ विष्णुः, ४५, २०, 'अन्धो दीपापहारी स्यात्' विष्णुधर्मोत्तरे, परा. मा. प्रा., पृ ५१६; but शङ्ख in page 517 reads पाण्डुरोगी दीपहारी

[8] पत्रहृत् क्षयी—क

[9] खण्डनारकः—क, खञ्जक·, खण्डकार —इति च विज्ञानेश्वरपाठौ, कारण्डक·—वैद्यनाथः, खण्डनकारकः—मदनपारिजात..

[10] विज्ञानेश्वर cites sūtras 23 to 66 under गौतम (See footnote 1,p 12 at the beginning of this chapter) cf, गौतमोऽपि क्वचिद्विशेषमाह—अनृत etc याज्ञ. मिता· (pp 370-371) माधव follows him वैद्यनाथ (pp 861-862) and मदनपारिजात (pp 701-702) cites under वृद्धगौतम.

[11] अनृतवाक् स्वल्पबल.—क; अनृतवागुल्बलः—विज्ञानेश्वरमाधवौ; अनृतवाक् खलः—वैद्यनाथ·, अनृतवाक् मुहुर्मुहु. etc.—मदनपारिजातः.

[1]जलोदरो दारत्यागी ॥ २४ ॥

[2]कूटसाक्षी श्लिष्टपदुच्छ्रितजङ्घाचरण· ॥ २५ ॥

विवाहविघ्नकर्ता [3]छिन्नोष्ठ· ॥ २६ ॥

[4]अवगोरणी छिन्नहस्तः ॥ २७ ॥

[5]अयाज्ययाजको वराहः ॥ २८ ॥

अनिमन्त्रितभोजी वायसः ॥ २९ ॥

मृष्टैकभोजी[6] वानरः ॥ ३० ॥

मातृघ्नोऽन्धः ॥ ३१ ॥

[7]स्नुषागामी वातवृषणः ॥ ३२ ॥

चतुष्पथे विण्मूत्रविसर्जनेन[8] मूत्रकृच्छ्री ॥ ३३ ॥

कन्यादूषक· षण्ढ[9] ॥ ३४ ॥

[1] अवलो दारत्यागी—क, दारत्यागी जलोदरी— विज्ञानेश्वरः.

[2] कूटसाक्षी नीपदुच्छ्रित—अ; कूटसाक्षी श्लीपदी उच्छिन्नजङ्घाचरण (अस्थूल-जङ्घाचरण.)—विज्ञानेश्वर.; कूटसाक्षी श्लीपदी उच्छूनजङ्घाचरण.—माधवमदनपारिजातौ; श्लीपदी कूटसाक्षी उच्छ्रितजङ्घाचरण:—वैद्यनाथ

[3] भिन्नोष्ठः—क.

[4] अपघोणाः—क; अवगूरणः—विज्ञानेश्वरमाधवौ; गोरक्षणे—वैद्यनाथ·; अव-गोरणकर्ता—मदनपारिजात·

[5] *Sūtras* 28, 29 and 30 are omitted here and cited after *sūtra* 42 by विज्ञानेश्वर, माधव, वैद्यनाथ and मदनपारिजात.

[6] इष्टैरभोजी—क; मिष्टैकभोजी—मदनपारिजात·

[7] स्नुषाहा वृष·—क

[8] विण्मूत्रविसर्जनी—अ, ·विण्मूत्रविसर्जने — विज्ञानेश्वरमाधवमदनपारिजाताः; विण्मूत्रविसर्जनो—वैद्यनाथः.

[9] cf, चाण्डाल्यवकीर्णी कन्यादूषी सगोत्रागाम्यबीजी। शङ्खलिखितौ, परा. मा-प्रा. पृ. ५२२.

[1]ईर्ष्यालुर्मशकः ॥ ३५ ॥

पित्रा[2] विवदमानोऽपस्मारी ॥ ३६ ॥

न्यासापहार्यनपत्यः ॥ ३७ ॥

बालघाती मृतापत्यः[3] ॥ ३८ ॥

[4]रत्नापहार्यतिदरिद्रः ॥ ३९ ॥

विद्याविक्रयी[5] [6]पुरुषमृगः ॥ ४० ॥

[7]वेदविक्रयी द्वीपी ॥ ४१ ॥

बहुयाजको[8] जलप्लवः[9] ॥ ४२ ॥

यतस्ततोऽश्नन्[10] मार्जारः ॥ ४३ ॥

कक्षवनदाही[11] खद्योत ॥ ४४ ॥

[12]वामाचारो मुखविगन्धि ॥ ४५ ॥

[1] ह्रीर्ष्यालुर्मशक —अ, माधव cites *sūtra* 46 before this

[2] पित्रोः—माधव .

[3] *Sūtra* 38 is omitted by विज्ञानेश्वर, माधव, वैद्यनाथ and मदनपारिजात.

[4] रत्नापहार्यप्यतिदरिद्र —अ, रत्नापहारी अत्यन्तदरिद्र —विज्ञानेश्वरमाधववैद्यनाथ-मदनपारिजाता .

[5] विद्याक्रयी—अ, वेदविक्रयी—माधव:

[6] पुरुषः मृगः—मदनपारिजात

[7] *Sūtra* 41 is omitted by माधव.

[8] बहुवाचको—वैद्यनाथ .

[9] *Sūtras* 28, 29 and 30 are cited after this *sūtra* by विज्ञानेश्वर, माधव, वैद्यनाथ and मदनपारिजात

[10] यस्ततोऽश्नन्—अ; यत्र तत्राश्नन्—मदनपारिजातः.

[11] कक्षवनदहनात्—विज्ञानेश्वरः, कक्षवनदाहक.—वैद्यनाथः.

[12] दालुकाचार्यो मुखविंगधः—अ, दारुकाचार्यो मुखविगन्धिः—विज्ञानेश्वरः; दारकाचार्यो मुखविगन्ध:—माधव , दारकाचार्यो मुखविट्गन्ध.—वैद्यनाथ ; दारिकाचार्यो मुखविगन्ध:—मदनपारिजात;

पर्युषितभोजी कृमिः[1] ॥ ४६ ॥

अदत्तादायी बलीवर्दः ॥ ४७ ॥

मत्सरी भ्रमरः ॥ ४८ ॥

अग्न्युत्सादी [2]मण्डलकुष्ठी ॥ ४९ ॥

शूद्राचार्यः[3] श्वपाक· ॥ ५० ॥

गोहर्ता सर्पः ॥ ५१ ॥

स्नेहापहारी क्षयी[4] ॥ ५२ ॥

[5]चण्डालीपुल्कसीगाम्यजगर·[6] ॥ ५३ ॥

प्रव्रजितागामी[7] मरुपिशाचः ॥ ५४ ॥

शूद्रीगामी[8] [9]दीर्घकीटः ॥ ५५ ॥

सवर्णागामी[10] दरिद्र[11] ॥ ५६ ॥

[1] *Sūtra* 46 is omitted here and cited after *sūtra* 34 by माधव.

[2] मन्दकुष्ठिः—अ, मण्डलकुक्षी—वैद्यनाथ

[3] शूद्राचार —अ

[4] विज्ञानेश्वर, माधव, वैद्यनाथ and मदनपारिजात cite two *additional sūtras* after *sūtra* 52—अन्नापहार्यजीर्णी। ज्ञानापहारी मूक· ॥ विज्ञानेश्वर reads आशापहारी for अन्नापहारी

[5] माधव omits *sūtras* 53 to 56 here and cites them in page 518 (Vol II)

[6] चाण्डालीपुल्कसी°—अ ; चाण्डालीपुल्कसीगमने अजगर·—विज्ञानेश्वरमाधवमदनपारिजाता ; चाण्डालीपुल्कसीगमक· रजकः—वैद्यनाथ

The order of citation by माधव is different *Sūtras* 53 to 56 and 63 are omitted here and cited together in page 518 of (Vol II)

[7] प्रव्रजितागमने—विज्ञानेश्वरमाधववैद्यनाथमदनपारिजाता .

[8] शूद्रीगमने—विज्ञानेश्वर , शूद्रागमने—माधववैद्यनाथमदनपारिजाता

[9] दीपघटः—वैद्यनाथ .

[10] सवर्णाभिगामी—विज्ञानेश्वरमाधववैद्यनाथमदनपारिजाताः

[11] माधव cites *sūtra* 63 after *sūtra* 56. See परा. मा. प्रा., पृ. ५१८.

जलहारी[1] मत्स्यः[2] ॥ ५७ ॥

क्षीरहारी[3] [4]बकः ॥ ५८ ॥

[5]वार्धुषिकोऽङ्गहीनः[6] ॥ ५९ ॥

अविक्रेयविक्रयी[7] गृध्रः ॥ ६० ॥

राजमहिषीगामी नपुंसकः[8] ॥ ६१ ॥

राजाक्रोशको[9] गर्दभः ॥ ६२ ॥

[10]गोगामी मण्डूकः ॥ ६३ ॥

अनध्यायेऽध्ययने[11] [12]सृगालः ॥ ६४ ॥

परद्रव्यापहारी परप्रेष्यो [13]भवति[14] ॥ ६५ ॥

1 जलापहारी—माधवः—ibid, p 515

2 वैद्यनाथ cites one *additional sūtra* after this—'पञ्चमहापातकानि मिथ्यः'

3 क्षारहारी—वैद्यनाथः.

4 भषक —क, बलाकः—विज्ञानेश्वरमाधववैद्यनाथमदनपारिजाताः.

5 *Sūtras* 59 to 64 are omitted by माधव.

6 cf, वार्धुषिको भ्रामरी । विष्णु, ४५, २६.

7 विक्रेयक्रिया—अ

8 cf., गत्वा तु राजमहिषीं षण्डो भवति मानव ।

वृद्धगौतमः, परा. मा. प्रा., पृ. ५२२.

9 दुराक्रोशी—वैद्यनाथः.

10 गो—omitted by अ

11 अनध्यायाध्ययने—विज्ञानेश्वर, अनध्यायाध्यायी—वैद्यनाथ.

12 शृगाल —मदनपारिजात.

13 भवति—omitted by विज्ञानेश्वर, माधव, वैद्यनाथ and मदनपारिजात

14 cf, परद्रव्यापहारी च भृत्यानां वृत्तिजीवकः । उमामहेश्वरसंवादे, परा. मा. प्रा., पृ. ५१६.

[1]एतादृशै. [2]पापैः स्त्रियोऽप्येतेषामेव जन्तूनां भार्यात्वमुपगच्छन्ति[3] ॥ ६६ ॥

इति द्वितीयप्रश्ने चतुर्थोऽध्यायः

पञ्चमोऽध्यायः

अथ ब्रह्महत्यासमं पातकं[4] गुरूणामप्यधिक्षेपो वेदनिन्दा सुहृद्वधोऽधीतस्य [5]च नाशनम्[6] ॥ १ ॥

अथ सुरापानसमं [7]मत्या लशुनछत्राकविड्वराह[8]ग्रामकुक्कुटपलाण्डुगृञ्जनभक्षणं कौटिल्यं रजस्वलामुखास्वाद[9]श्चतुर्वेदविदहमित्यनृतभाषणं च[10] ॥ २ ॥

[1] विज्ञानेश्वर cites two *additional sūtras* after *sūtra* 65 मत्स्यवधे गर्भवासाः । इत्येतेऽनूर्ध्वगमना । याज्ञ. मिता., p 371, वैद्यनाथ adds only one मत्स्यवधे गर्दभ., p 862, मदनपारिजात adds two *sūtras* मत्स्यवधे गर्भवासी । इत्येकेऽनूर्ध्वगामिन., p 702

[2] प्राप्ते—अ

[3] cf, स्त्रियोऽप्येतेन कल्पेन हृत्वा दोषमवाप्नुयु ।
एतेषामेव जन्तूना भार्यात्वमुपयान्ति ता ॥ मनु.; १२, ६९.

[4] पातक वक्ष्यामो गुरूणा०—क

[5] च—omitted by क.

[6] cf, गुरूणामप्यधिक्षेपो वेदनिन्दा सुहृद्वध ।
ब्रह्महत्यासम ज्ञेयमधीतस्य च नाशनम् ॥ याज्ञवल्क्यः, ३, २२८.

[7] मत्स्यलशुन०—क

[8] ०विड्वराहकुक्कुट०—अ.

[9] चतुर्वेद एव चतुर्वेदोऽहमित्यनृतभाषण च—क, चतुर्थवेदविदोहमित्यनृतभाषणं च—अ

[10] cf, निषिद्धभक्षणं जैह्म्यमुत्कर्षे च वचोऽनृतम् ।
रजस्वलामुखास्वादः सुरापानसमानि तु ॥ याज्ञवल्क्यः, ३, २२९.

अथ सुवर्णस्तेयसमं मनुष्यस्त्रीभूधेनुनिक्षेपाश्वरत्नापहरणं सर्वम्[1] ॥३॥

अथ [2]गुरुतल्पसमं [3]मित्रभार्याकुमारीभगिनीचण्डालीसमानगोत्रा-स्नुषागमनं प्रत्येकम्[4] ॥ ४ ॥

छत्राकं विड्वराहं च लशुन ग्रामकुक्कुटम् ।
पलाण्डु गृञ्जन चैव मत्या जग्ध्वा पतेन्नरः ॥ मनु , ५, १९

Also compare sūtras 1 and 2 with the following

अनृत च समुत्कर्षे राजगामि च पैशुनम् ।
गुरोश्चालीकनिर्बन्धः समानि ब्रह्महत्यया ॥
ब्रह्मोज्झता वेदनिन्दा कौटसाक्ष्य सुहृद्वध. ।
गर्हितानाद्ययोर्जग्धि. सुरापानसमानि षट् ॥ मनु , ११, ५५-५६.

अत्र याज्ञवल्क्यमनुविष्णूना ब्रह्महत्यासमसुरापानसमपातकनिर्देशे व्यत्यासो दृश्यते। 'वेदनिन्दा, सुहृद्वध , अधीतस्य च नाशनम ' इतीमानि ब्रह्महत्यासमान्याह याज्ञवल्क्य (३,२२८)। 'ब्रह्मोज्झता, वेदनिन्दा, सुहृद्वध' इति तान्येव सुरापानसमान्याह मनुः (११, ५६)। 'उत्कर्षे च वचोऽनृतम्' इति सुरापानसममाह याज्ञवल्क्य (३,२२९)। 'अनृत च समुत्कर्षे' इति तदेव ब्रह्महत्यासममाह मनु. (११, ५५)। विष्णुरपि 'कौटसाक्ष्य सुहृद्वध एतौ सुरापानसमौ' (३६, २) इति सुहृद्वधस्य सुरापानसमत्वमभ्युपैति मनुरिव, ब्रह्महत्यासमत्वं च याज्ञवल्क्य. (३, २२८)। "अनृतवचनमुत्कर्षे। राजगामि च पैशुनम्। गुरोश्चालीकनिर्बन्ध । वेदनिन्दा। अधीतस्य च त्याग.। अभोज्यान्नभक्ष्य-भक्षणम्।" (३७, १—५, ७) इत्येतान्युपपातकेषु पठति विष्णु.। सुरापानसमब्रह्म-हत्यासमेषु याज्ञवल्क्यमनू पठतः। विष्णुपठितानि ब्रह्महत्यासमानि त्वेतद्भिन्नान्येव। 'यागस्थस्य क्षत्रियस्य वैश्यस्य च रजस्वलायाश्चान्तर्वत्न्याश्चात्रिगोत्रायाश्चाविज्ञातस्य गर्भस्य शरणागतस्य च घातन ब्रह्महत्यासमानि' (३६, १) इति। अत्र च गौतम-धर्मसूत्रपरिशिष्टं याज्ञवल्क्यमतानुरोधि ।

[1] cf., अश्वरत्नमनुष्यस्त्रीभूधेनुहरण तथा ।
निक्षेपस्य च सर्वं हि सुवर्णस्तेयसंमितम् ॥ याज्ञवल्क्यः, ३, २३०.
निक्षेपस्यापहरणं नराश्वरजतस्य च ।
भूमिवज्रमणीना च रुक्मस्तेयसम स्मृतम् ॥ मनु., ११, ५७.
ब्राह्मणस्य भूम्यपहरण निक्षेपापहरण सुवर्णस्तेयसमम्। विष्णु., ३६, ३.

[2] गुरुतल्पगतिसमं—क.

[3] मित्रभार्याकुमारीचाण्डालीभगिनीसमान०—अ.

[4] cf., सखिभार्याकुमारीषु स्वयोनिष्वन्त्यजासु च ।

अथोपपातकानि ॥ ५ ॥

कालेऽनुपनीतता ॥ ६ ॥

गोवधः ॥ ७ ॥

[1]ऋणानामनपाकरणम् ॥ ८ ॥

तथा देवर्षिपितॄणा च ॥ ९ ॥

[2]सत्यधिकारेऽनाहिताग्नित्वम् ॥ १० ॥

[3]लवणादेर्विक्रयः ॥ ११ ॥

ज्येष्ठस्य तिष्ठतः [4]कनीयसो भ्रातुर्विवाहः[5] ॥ १२ ॥

सगोत्रासु सुतस्त्रीषु गुरुतल्पसम स्मृतम् ॥ याज्ञवल्क्य , ३, २३१.
रेतःसेक स्वयोनीषु कुमारीष्वन्त्यजासु च।
सख्यु पुत्रस्य च स्त्रीषु गुरुतल्पसमं विदुः ॥ मनु , ११, ५८.

पितृव्यमातामहमातुलश्वशुरनृपपत्न्यभिगमनं गुरुदारगमनसमम् । पितृष्वसृमातृष्वसृस्वसृगमनं च । श्रोत्रियर्त्विगुपाध्यायमित्रपत्न्यभिगमन च । स्वसुः सख्याः सगोत्राया उत्तमवर्णाया कुमार्या अन्त्यजाया रजस्वलाया शरणागताया. प्रव्राजिताया निक्षिप्तायाश्च ॥ विष्णु·, ३६, ४—७

[1] ऋणानामपाकरणम्—अ.

[2] सत्राधिकार्यनाहिताग्नित्वम्—अ.

[3] लवणादिविक्रय·—अ

[4] कनिष्ठभ्रातृविवाह —अ.

[5] Compare sūtras 6 to 12 with the following

गोवधो व्रात्यता स्तेयमृणाना चानपाक्रिया ।
अनाहिताग्नितापण्यविक्रयः परिवेदनम् ॥ याज्ञवल्क्य· ३, २३४.

'व्रात्यता' ११, ६२; 'गोवध' ११, ५९, 'ऋणानामनपाक्रिया' ११, ६५; 'अनाहिताग्निता' ११, ६५, 'अपण्याना च विक्रयः' ११, ६२, 'परिवित्तितानुजेऽनूढे परिवेदनमेव च' ११, ६०—मनु .

व्रात्यता, ३७, १९; क्षत्रविट्शूद्रगोवधः, ३७, १३; देवर्षिपितृऋणानामनपाक्रिया, ३७, २९; अनाहिताग्निता, ३७, २८; अविक्रेयविक्रयः, ३७, १४; परिवित्तितानुजेन ज्येष्ठस्य, ३७, १५—विष्णुः.

[1]पणपूर्वाध्यापकाध्ययनग्रहणम् ॥ १३ ॥

पणपूर्वाध्यापनं[2] च ॥ १४ ॥

अधिकवृध्युपजीवित्वम् ॥ १५ ॥

लवणस्योत्पादनम्[3] ॥ १६ ॥

स्त्रीशूद्रवधः ॥ १७ ॥

[4]निन्दितार्थोपजीवनम् ॥ १८ ॥

नास्तिक्यम् ॥ १९ ॥

अपत्यानां विक्रयः[5] ॥ २० ॥

धान्यत्रपुसीसपश्वपहरणम् ॥ २१ ॥

अयाज्यानां च याजनम् ॥ २२ ॥

पितृमातृसुतत्यागः ॥ २३ ॥

[1] परपूर्वापकारोऽनध्ययनग्रहणम्—अ

[2] वर्णपूर्वाध्यापनं—अ

[3] Compare sūtras 13 to 16 with the following:

भृतादध्ययनादानं भृतकाध्यापनं तथा ।

[पारदार्यं पारिवित्त्यं] वार्धुष्यं लवणक्रिया ॥ याज्ञवल्क्यः ३, २३५

'भृत्या चाध्ययनादानं भृत्याध्यापनमेव च' ११, ६२, 'वार्धुष्यं' ११, ६१—मनु.

भृताच्चाध्ययनादानम् । ३७, २१; भृतकाध्यापनम् ३७, २०—विष्णु

[4] निन्दितार्थोपजीवनम्—अ, क

[5] Compare sūtras 17 to 20 with the following

स्त्रीशूद्रविट्क्षत्रवधो निन्दितार्थोपजीवनम् ।

नास्तिक्यं [व्रतलोपश्च] सुतानां चैव विक्रयः ॥ याज्ञवल्क्यः, ३, २३६

'स्त्रीशूद्रविट्क्षत्रवधो' ११, ६६, 'निन्दितान्नादनं तथा' ११, ६४, 'नास्तिक्यं च' ११, ६६; 'अपत्यस्य च विक्रयः' ११, ६१—मनु..

क्षत्रविट्शूद्रगोवधः । ३७, १३; विकर्मजीवनम् । ३७, ११, नास्तिकता । ३७, ३१—विष्णु..

तटाकारामविक्रयः[1] ॥ २४ ॥

कन्यादूषणम् ॥ २५ ॥

आत्मार्थे पाकक्रियारम्भः ॥ २६ ॥

[2]मद्यपस्त्रीसंगमः ॥ २७ ॥

सुतस्य संस्काराकरणम्[3] ॥ २८ ॥

आर्द्रद्रुमच्छेदनम् ॥ २९ ॥

स्त्रियं पण्यत्वेन प्रयोज्य तल्लब्धोपजीवनम् ॥ ३० ॥

स्त्रीधनोपजीवनं च ॥ ३१ ॥

प्राणिवधेन जीवनम् ॥ ३२ ॥

[1] Compare sūtras 21 to 24 with the following

धान्यकुप्यपशुस्तेयमयाज्याना च याजनम् ।
पितृमातृसुतत्यागस्तडागारामविक्रयः ॥ याज्ञवल्क्य ; ३, २३७

'धान्यकुप्यपशुस्तेयम्' ११, ६६, '[गोवधो]ऽयाज्यसयाज्य[पारदार्यात्मवि-क्रया]' ११, ५९; 'गुरुमातृपितृत्यागः [स्वाध्यायाग्न्यो]सुतस्य च' ११, ५९, 'तडागाराम[दाराणामपत्यस्य च] विक्रय' ११, ६१—मनु.

परस्वापहरणम् । ३७, ८, अयाज्ययाजनम् । ३७, १०, अग्निपितृसुतदाराणा च । ३७, १४—विष्णुः.

[2] मद्यस्त्रीसंगम —अ.

[3] Compare sūtras 25 to 28 with the following

कन्यासंदूषणं चैव [परिविन्दकयाजनम् ।
कन्याप्रदानं तस्यैव कौटिल्य व्रतलोपनम् ॥]
आत्मनोऽर्थे क्रियारम्भो मद्यपस्त्रीनिषेवणम् ।
स्वाध्यायाग्निसुतत्यागो [बान्धवत्याग एव च ॥] याज्ञवल्क्य, ३, २३८—२३९.

'कन्याया दूषण चैव' ११, ६१; 'आत्मार्थं च क्रियारम्भ' ११, ६४; 'मद्यपस्त्रीनिषेवणम्' ११, ६६; 'सुतस्य च' ११, ५९—मनु.

आत्मार्थे क्रियारम्भ । ३७, २७, मद्यपस्त्रीनिषेवणम् । ३७, ३३; अग्निपितृ-मातृसुतदाराणा च । ३७, ६—विष्णुः,

औषधं दत्वा वशीकरणेन जीवनम् ॥ ३३ ॥

तिलेक्षुपीडाकरणस्य प्रवर्तनम् ॥ ३४ ॥

द्रव्यग्रहणेन [1]परदासीकरणरूपात्मविक्रयः[2] ॥ ३५ ॥

शूद्रसेवनम् ॥ ३६ ॥

हीनेषु मैत्रीकरणम् ॥ ३७ ॥

साधारणस्त्रीसंभोगः ॥ ३८ ॥

[3]अगृहीताश्रमित्वम् ॥ ३९ ॥

[4]परान्नपरिपुष्टता[5] ॥ ४० ॥

[6]असच्छास्त्राभिगमनम् ॥ ४१ ॥

आकरेष्वधिकारिता ॥ ४२ ॥

[7]भार्याया विक्रयः ॥ ४३ ॥

[1] सी in परदासी omitted by क.

[2] Compare sūtras 29 to 35 with the following

इन्धनार्थ द्रुमच्छेद· स्त्रीहिंस्रौषधिजीवनम् ।
हिंस्रयन्त्रविधान च व्यसनान्यात्मविक्रयः ॥ याज्ञवल्क्यः, ३, २४०.

'इन्धनार्थमशुष्काणा द्रुमाणामवपातनम्' ११, ६४, 'हिंसौषधीना स्त्र्याजीवोऽभिचारो मूलकर्म च' ११, ६३; 'महायन्त्रप्रवर्तनम्' ११, ६३, '*आत्मविक्रया.' ११, ५९—मनु •

द्रुमगुल्मवल्लीलतौषधीना हिंसा । ३७, २४, स्त्रिया जीवनम् । ३७, २५, अभिचारबलकर्मसु प्रवृत्ति । ३७, २६; महायन्त्रप्रवर्तनम् । ३७, २३—विष्णु·.

[3] स्वय ,गृहीताश्रमित्वम्—क.

[4] परान्नपरिपुष्टदेह.—क

[5] Compare sūtras 36 to 40 with the following

शूद्रप्रेष्य हीनसख्यं हीनयोनिनिषेवणम् ।
तथैवानाश्रमे वासः परान्नपरिपुष्टता ॥ याज्ञवल्क्यः, ३, २४१

[6] असच्छास्त्रादिगमनम्—क

[7] भार्याविक्रयः—क.

एकैकमुपपातकम्[1] ॥ ४४ ॥

उपपातके[2] तुरीयं पातके[3] सहस्रं महापातके द्विगुणं नरकं वर्ष-संख्यया[4] ॥ ४५ ॥

महापातकतां प्राप्नोत्यावृत्तमुपपातकम्[5] ॥ ४६ ॥

एवं[6] [7]जातिभ्रंशकरादिभिः[8] ॥ ४७ ॥

इति द्वितीयप्रश्ने पञ्चमोऽध्यायः

---

[1] Compare sūtras 41 to 44 with the following

असच्छास्त्राधिगमनमाकरेष्वधिकारिता ।

भार्याया विक्रयश्चैषामेकैकमुपपातकम् ॥ याज्ञवल्क्य , ३, २४२.

'असच्छास्त्राधिगमनम्' ११, ६६; 'सर्वाकरेष्वधीकार·' ११, ६३; 'तडागारामदाराणामपत्यस्य च विक्रय' ११, ६१; 'उपपातकम्', ११, ६६—मनुः.

असच्छास्त्राभिगमनम् । ३७, ३०; सर्वाकरेष्वधीकार । ३७, २२; अविक्रेयविक्रयः । ३७, ३१, इत्युपपातकानि । ३७, ३४—विष्णु .

[2] उपपातके—omitted by अ.

[3] पातकसहस्रं—अ.

[4] cf, पातकेषु सहस्रं स्यान्महत्सु(त्सु) द्विगुणं तथा ।

उपपातके तुरीय स्यान्नरकं वर्षसख्यया ॥ अङ्गिरा·, याज्ञ मिता., ३, २३३, पृ ३८४.

[5] cf, "युक्तमुपपातकादेरभ्यासापेक्षया पतनहेतुत्वम्"—याज्ञ. मिता., ३, २३४-२४२.

[6] इदं—क.

[7] जातिभ्रशकरादि—क

[8] cf, "एवं गोवधादीना प्रत्येकमुपपातकसंज्ञा वेदितव्या । मनुना (११, ६७–७०) पुनरन्यान्यपि निमित्तानि जातिभ्रशकरसंकरीकरणापात्रीकरणमलिनीकरणसंज्ञानि परिगणितानि ॥" याज्ञ. मिता , ३, २३४-२४२; पृ ३८३.

षष्ठोऽध्यायः

मातृगमनदुहितृगमनस्नुषागमनानि [1]प्रत्येकमतिपातकानि[2] ॥ १ ॥

स्वसृसख्याः[3] सगोत्राया उत्तमवर्णाया रजस्वलायाः प्रव्रजितायाः शरणागताया [4]निक्षिप्तायाश्च गमनं प्रत्येकमनुपातकानि[5] ॥ २ ॥

ब्राह्मणस्य [6]रुजःकरणमघ्रेयमद्ययोर्घ्रातिर्मत्या जैह्मयं [7]पशौ पुंसि च मैथुनकरणमित्येतानि जातिभ्रंशकराणि[8] ॥ ३ ॥

मृगेभाजाविमीनाहि[9]महिषीवधः [10]संकरीकरणम्[11] ॥ ४ ॥

निन्दितेभ्यो धनादानं शूद्रसेवनं वाणिज्यं कुसीदजीवनमसभ्य-

[1] प्रत्येकमतिपातकानि स्युः—क.

[2] cf , मातृगमनं दुहितृगमन स्नुषागमनमित्यतिपातकानि । विष्णु., ३४, १

[3] स्वसृसख्यायाः—अ ; सख्याया —क

[4] नि in निक्षिप्तायाश्च omitted by क.

[5] cf., स्वसुः सख्याः सगोत्राया उत्तमवर्णाया कुमार्या अन्त्यजाया रजस्वलायाः प्रव्रजिताया शरणागताया निक्षिप्तायाश्च । अनुपातकिनस्त्वेते etc —विष्णुः, ३६, ७–८.

[6] रज for रुजः—अ.

[7] पशुपुसि च—अ.

[8] cf . ब्राह्मणस्य रुज कृत्वा घ्रातिरघ्रेयमद्ययो· ।
जैह्मयं च मैथुन पुसि जातिभ्रंशकरं स्मृतम् ॥ मनुः, ११, ६७.
ब्राह्मणस्य रुजस्करणम् । अघ्रेयमद्ययोर्घ्राति । जैह्मयम् । पशुषु मैथुनाचरणम् । पुसि च । इति जातिभ्रंशकराणि ॥ विष्णु·, ३८, १–६

[9] The portion from 2 to 4 omitted by क

[10] सकलीकरणम्—अ and क.

[11] cf., खराश्वोष्ट्रमृगेभानामजाविकवधस्तथा ।
सकरीकरणं ज्ञेयं मीनाहिमहिषस्य च ॥ मनु·, ११, ६८
ग्राम्यारण्यानां पशूनां हिसा सकरीकरणम् । विष्णुः, ३९, १.

भाषणमपात्रीकरणम्[1] ॥ ५ ॥

[2]पक्षिजलचरकृमिकीटघातनं[3] जलजसूदनं [4]मद्यानुगतभोजनानि [5]फलेन्धनकुसुमस्तेयमित्येतन्मलिनीकरणमुच्यते[6] ॥ ६ ॥

[7]अतोऽन्यदनुक्तं पापजातं[8] प्रकीर्णकमिति कथ्यते[9] ॥ ७ ॥

अथ[10] महापातकादीना प्रायश्चित्तं संक्षेपेण[11] कथ्यते ॥ ८ ॥

ब्रह्महा शिरःकपाली ध्वजवानन्यच्छिरःकपालं[12] दण्डाग्रसमारोपितं[13] कृत्वा भिक्षाशी कर्म वेदयन्[14] स्वव्यापादितशिरःकपालात्मकध्वजवान्[15] तदलाभेऽन्यस्य[16] ब्राह्मणस्यैव[17] शिरःकपालं धृत्वा द्वादशाब्दानि कुटीं

[1] cf, निन्दितेभ्यो धनादानं वाणिज्यं शूद्रसेवनम् ।
अपात्रीकरण ज्ञेयमसत्यस्य च भाषणम् ॥ मनु., ११, ६९.
निन्दितेभ्यो धनादानं वाणिज्यं कुसीदजीवनमसत्यभाषण शूद्रसेवनमित्यपात्रीकरणम् । विष्णु., ४०, १

[2] कुक्षि for पक्षि—अ.

[3] ०घातजलजनूदनं—अ.

[4] मद्यानुगतो भोजनानि—अ.

[5] फलैव कुसुम°—क.

[6] cf., कृमिकीटवयोहत्या मद्यानुगतभोजनम् ।
फलैधःकुसुमस्तेयमधैर्यं च मलावहम् ॥ मनु., ११, ७०.
पक्षिणा जलचराणां जलजाना च घातनम् । कृमिकीटाना च । मद्यानुगतभोजनम् । इति मलावहानि ॥ विष्णु., ४१, १–४.

[7] ततोऽन्यदनुक्तं—क

[8] पातकजातं—क.

[9] cf, यदनुक्त तत्प्रकीर्णकम् । विष्णु., ४२, १

[10] अथ—omitted by अ

[11] साक्षेपेण—अ.

[12] ध्वजवान् यच्छिरःकपालं—क

[13] दण्डाग्रे समारोपित—क.

[14] वेदयन्—omitted by अ.

[15] द्रवयान् for ध्वजवान्—अ.

[16] तदलाभेनास्य—अ

[17] ब्राह्मणस्येव—अ.

कृत्वा वने [1]वसेत्[2] ॥ ९ ॥

वालवासी जटी[3] वृक्षमूले वसेत्[4] ॥ १० ॥

लोहितकेन मृन्मयखण्डशरावेण भिक्षायै ग्रामं[5] प्रविशेत् ॥ ११ ॥

सप्तागाराण्येव द्वारि[6] स्थितो भिक्षां याचेत[7] ॥ १२ ॥

[1] वसेद्वा—अ.

[2] cf , शिरःकपाली ध्वजवान् भिक्षाशी कर्म वेदयन् ।
ब्रह्महा द्वादशाब्दानि मितभुक् शुद्धिमाप्नुयात् ॥ याज्ञवल्क्य॰, ३, २४३.
ब्रह्महा द्वादश समा कुटी कृत्वा वने वसेत् ।
भैक्षाश्यात्मविशुध्यर्थं कृत्वा शवशिरोध्वजम् ॥ मनु , ११, ७२.

अरण्ये कुटीं कृत्वा वाग्यत शवशिरोध्वजोऽर्धशाणीपक्षमधोनाभ्युपरिजान्वाच्छाद्य ॥ आपस्तम्ब॰, १, २४, ११

कपाली खट्वाङ्गी गर्दभचर्मवासा अरण्यनिकेतनः श्मशाने ध्वज शवशिरः कृत्वा कुटी कारयेत् तामावसेत् . स्वकर्माचक्षाण. ॥ बोधायन , २, १, ३.

खट्वाङ्गकपालपाणिर्वा द्वादशसंवत्सरान् ब्रह्मचारी भैक्ष्याय ग्रामं प्रविशेत्कर्माचक्षाणः ॥ गौतम , २२ ३.

[3] आहवजटी for वालवासा जटी—अ.

[4] cf , कृतवापनो वा निवसेद्ग्रामान्ते गोव्रजेऽपि वा ।
आश्रमे वृक्षमूले वा गोब्राह्मणहिते रतः ॥ मनु॰, ११, ७८.
"कृतवापनो वेति विकल्पाज्जटी वेति लक्ष्यते । अत एव संवर्तः—
ब्रह्महा द्वादशाब्दानि वालवासा जटी ध्वजी ॥ इति "—याज्ञ॰ मिता., ३, ३४३ पृ ३८४.
कपाली खट्वाङ्गी गर्दभचर्मवासा etc.—बोधायन॰, २, १, ३.

[5] मृन्मयखण्डशरावेण भिक्षाचरणं ग्रामं—क.

[6] यतवागरण्ये द्वारि—अ

[7] Compare sūtras 11 and 12 with the following
खण्डेन लोहितकेन शरावेण ग्रामे प्रतितिष्ठेत । कोऽभिशस्ताय भिक्षामिति सप्तागारं चरेत् ॥ आपस्तम्ब , १, २४, १४–१५
. . . . . . सप्तागाराणि भैक्ष चरन् स्वकर्माचक्षाणस्तेन प्राणान् धारयेत् ॥ बोधायनः, २, १, ३.

मितभुक् शुद्धिमाप्नुयात्[1] ॥ १३ ॥

ततः सेतुस्नानं कुर्वीत[2] ॥ १४ ॥

ब्राह्मणेभ्यो[3] गोभूतिलहिरण्यादिकं दद्यात्[4] ॥ १५ ॥

तत. पूतो [5]भवत्यकामतः ॥ १६ ॥

कामतश्चेद्भृग्वग्निपतनं निर्दिष्टम्[6] ॥ १७ ॥

इति द्वितीयप्रश्ने षष्ठोऽध्याय.

---

[1] cf, 'मितभुक् शुद्धिमाप्नुयात्' याज्ञवल्क्य·, ३, २४३
'ब्रह्महत्यापनोदाय मितभुङ्नियतेन्द्रिय ' मनु , ११, ७५

[2] cf , रामचन्द्रसमादिष्ट नलसचयसंचितम् ॥
सेतुं दृष्ट्वा समुद्रस्य ब्रह्महत्यां व्यपोहति ।
सेतुं दृष्ट्वा विशुद्धात्मा त्ववगाहेत सागरम् ॥ पराशरः, १२, ६९–७०.

[3] ब्राह्मणेभ्यो—omitted by अ; ब्राह्मणे—क.

[4] cf., पात्रे धनं वा पर्याप्तं दत्वा शुद्धिमवाप्नुयात् । याज्ञवल्क्य·, ३, २५०.
सर्वस्वं वेदविदुषे ब्राह्मणायोपपादयेत् ।
धन वा जीवनायाल गृह वा सपरिच्छदम् ॥ मनु·, ११, ७६

[5] भवति । सकामतश्चेद्भृग्वग्नौ पतन नदीष्वपिर्न—अ.

[6] Compare sūtras 16 and 17 with the following .
प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत् ।
कामतो व्यवहार्यस्तु वचनादिह जायते ॥ याज्ञवल्क्य., ३, २२६.
इयं विशुद्धिरुदिता प्रकाम्याकामतो द्विजम् ।
कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते ॥ मनु , ११, ८९.
प्रास्येदात्मानमग्नौ वा समिद्धे त्रिरवाक्शिरा· ॥ मनु , ११, ७३
प्रायश्चित्तमग्नौ सक्तिर्ब्रह्मघ्नस्त्रिरवच्छातस्य ॥ गौतम·, २२, १.
न कामतो महापापं नरः कुर्यात्कथंचन ।
न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते ॥
अङ्गिरा·, याज्ञ. मिता, ३, २४७ ; पृ. ३९२.

सप्तमोऽध्यायः

सुरापः सुराम्बुघृतगोमूत्रपयसामन्यतममग्निस्पर्शाद्दाहशक्तिकं कृत्वा[1] पीत्वा मरणाच्छुद्धिमाप्नुयात्[2] ॥ १ ॥

ब्राह्मणस्य [3]माधूकमैक्षवं तालं खार्जूरं पानसं द्राक्षं मधूत्थं सैरमारिष्टं[4] मैरेयं[5] [6]नारिकेलजमेकादशमद्यानि निषिद्धानि [7]कामतः[8] ॥ २ ॥

[9]अकामतश्चेद्बालवासा जटी वृक्षमूले ब्रह्महत्याव्रतं चरेत् ॥ ३ ॥

[1] ०पयसामन्यतममग्नेः स्पर्शाद्दाहशक्तेः पक्व कृत्वा—अ.

[2] cf, सुराम्बुघृतगोमूत्रपयसामग्निसनिभम् ।
सुरापोऽन्यतम पीत्वा मरणाच्छुद्धिमाप्नुयात् ॥ याज्ञवल्क्य, ३, २५३.
सुरां पीत्वा द्विजो मोहादग्निवर्णां सुरा पिबेत् ।
तया स काये निर्दग्धे मुच्यते किल्बिषात्तत. ॥
गोमूत्रमग्निवर्णं वा पिबेदुदकमेव वा ।
पयो घृत वामरणाद्गोशकृद्रसमेव वा ॥ मनु॰, ११, ९०–९१.

[3] मधूकमैक्षवं—क

[4] सैरमारिष्टं—omitted by क.

[5] सैरमादिष्टमैरेयं—अ

[6] नारिकेलमजमेकादशमद्यानि—क

[7] कामतश्चेद्वा—अ.

[8] cf, पानस द्राक्षं माधूकं खार्जूरं तालमैक्षवम् ।
मधूत्थ सैरमारिष्टं मैरेयं नारिकेलजम् ॥
समानानि विजानीयान्मद्यान्येकादशैव तु ॥ पुलस्त्यः, याज्ञ. मिता., ३, २५३; पृ. ३९७.
यक्षरक्षःपिशाचान्नं मद्य मास सुरासवम् ।
तद्ब्राह्मणेन नात्तव्य देवानामश्नता हविः ॥ मनुः, ११, ९५.

[9] वासोपजीवितब्रह्महत्याव्रतं—अ.

पिण्याकं तण्डुलावयवान्वा[1] त्रिवर्षं निशि भक्षयेत्[2] ॥ ४ ॥

त्रयो वर्णा अज्ञानात्तु रेतोविण्मूत्रं सुरा पीत्वा पुनःसंस्कारमर्हन्ति[3] ॥ ५ ॥

मद्यभाण्डस्थितं[4] तोयमज्ञानाद्यदि कश्चिद्द्विजः पिबेत् पद्मोदुम्बरबिल्व[5]पलाशकुशोदकं पीत्वा त्रिरात्रेण शुध्यति[6] ॥ ६ ॥

[1] तण्डुल वा—अ.

[2] Compare sūtras 3 and 4 with the following

वालवासा जटी वापि ब्रह्महत्याव्रत चरेत् ।
पिण्याक वा कणान्वापि भक्षयेत्त्रिसमा निशि ॥ याज्ञवल्क्यः, ३, २५४
कणान्वा भक्षयेदब्दं पिण्याकं वा सकृन्निशि ।
सुरापानापनुत्त्यर्थं वालवासा जटी ध्वजी ॥ मनु, ११, ९२.

[3] cf, अज्ञानात्तु सुरा पीत्वा रेतोविण्मूत्रमेव च ।
पुन.सस्कारमर्हन्ति त्रयो वर्णा द्विजातयः ॥ याज्ञवल्क्य, ३, २५५.
अज्ञानात्प्राश्य विण्मूत्र सुरासंस्पृष्टमेव च ।
पुन संस्कारमर्हन्ति त्रयो वर्णा द्विजातय ॥ मनु, ११, १५०.
अज्ञानाद्वारुणीं पीत्वा संस्कारेणैव शुध्यति ॥ मनुः, ११, १४६.

अमत्या पाने पयोघृतमुदकं वायु प्रतित्र्यह तप्तानि स तप्तकृच्छ्रः । ततोऽस्य सस्कारः । मूत्रपुरीषरेतसा च प्राशने ॥ गौतम, २३, २–४

Also compare with वसिष्ठ, २०, २२–२३; and बोधायनः, २, १, २०.

[4] मद्यभाण्डान्वितं—अ.

[5] पालाश for पलाश—अ.

[6] cf., मद्यभाण्डस्थितं तोय यदि कश्चिद्द्विजः पिबेत् ।
पद्मोदुम्बरबिल्वपलाशानामुदक पीत्वा त्रिरात्रेण विशुध्यति ॥
वसिष्ठः, २०, २४.

ज्ञानतः पञ्चरात्रं शङ्खपुष्पीश्रृतं पयः[1] पिबेत्[2] ॥ ७ ॥

सुरापानसमे[3] लशुनादिभक्षणेऽर्धप्रायश्चित्तं[4] चरेत्[5] ॥ ८ ॥

सुवर्णस्तेनः[6] प्रकीर्णकेशं[7] आर्द्रवासा[8] आयसं मुसलं स्कन्धे निधाय राजानमुपतिष्ठेदिदं[9] पापं मया कृतमनेन मुसलेन घातयस्वेति ॥९॥

स राज्ञा[10] सकृद्धननाच्छिक्षितः सन् पूतो भवतीत्येवं सकृत्ताडनेन हतो मृतः शुध्येत ॥ १० ॥

[1] शङ्खपृष्ठतः पयः—अ ; शङ्खपुष्पश्रितं पयः—क.

[2] cf., अपः सुराभाजनस्था मद्यभाण्डस्थितास्तथा ।
पञ्चरात्रं पिबेत्पीत्वा शङ्खपुष्पीश्रितं पयः ॥ मनुः, ११, १४७.

अपः सुराभाजनस्थाः पीत्वा सप्तरात्रं शङ्खपुष्पीशृतं पयः पिबेत् । मद्यभाण्डस्थाश्च पञ्चरात्रम् ॥ विष्णुः, ५१, २३–२४ ;

"ज्ञानतः पाने तु विष्णूक्तम्—मद्यभाण्डस्थितं तोयं पीत्वा" etc. याज्ञ. मिता., ३, २५५ ; पृ. ४०१–४०२.

[3] सुरापानसमं—अ and क.

[4] लशुनादिभक्षणेऽथ प्रायश्चित्तं चरेत्—अ.

[5] cf., छत्राकं विड्वराहं च लशुनं ग्रामकुक्कुटम् ।
पलाण्डुं गृञ्जनं चैव मत्या जग्ध्वा पतेद्द्विजः ॥ मनुः, ५, १९
गर्हितानाद्ययोर्जग्धिः सुरापानसमानि षट् । मनुः, ११, ५६.

तत्र स्वभावदुष्टलशुनगृञ्जनछत्राकविड्वराहग्रामकुक्कुटपलाण्डूनां प्रत्येकर्मत्या सकृद्भक्षणे सांतपनम् । अभ्यासे यतिचान्द्रायणम् । मत्या सकृच्चेचान्द्रम् । अभ्यासे तदावृत्तिः । अत्यन्ताभ्यासे सुरापानसमं प्रायश्चित्तम् । अन्ते पुनरुपनयनमेतेषु सर्वत्र । . . . . सर्वत्र तत्कालछर्दितेऽर्धप्रायश्चित्तम् ॥ प्रायश्चित्तेन्दुशेखरः, पृ. ६१.

[6] सुवर्णस्तेयेन—अ.

[7] प्रकीर्णेन—अ.

[8] आर्द्रवाससा—अ.

[9] आयसमुसलं स्कन्धेनादाय राजानमवतिष्ठन्निदं—अ.

[10] राजा—अ ; राज्ञः—क.

मुक्तो वा जीवन्नपि स्तेनस्तेयाद्विमुच्यते[1] ॥ ११ ॥

अकामेन कृतं यत्पापं[2] तत्कामाद्विगुणं[3] भवेत्[4] ॥ १२ ॥

[1] Compare sūtras 9 to 11 with the following

ब्राह्मणस्वर्णहारी तु राज्ञे मुसलमर्पयेत् ।
स्वकर्म ख्यापयंस्तेन हतो मुक्तोऽपि वा शुचि ॥ याज्ञवल्क्यः, ३, २५७.
सुवर्णस्तेयकृद्विप्रो राजानमभिगम्य तु ।
स्वकर्म ख्यापयन् ब्रूयान्मा भवाननुशास्त्विति ॥
गृहीत्वा मुसल राजा सकृद्धन्यात्तु तं स्वयम ।
वधेन शुध्यति स्तेनो ब्राह्मणस्तपसैव तु ॥ मनु , ११, ९९–१००.

सुवर्णस्तेयकृद्राज्ञे कर्माचक्षाणो मुसलमर्पयेत । वधात्त्यागाद्वा पूतो भवति ॥ विष्णु , ५२, १–२

स्तेन प्रकीर्णकेशोंऽसे मुसलमाधाय राजान गत्वा कर्माचक्षीत तेनैन हन्यात् । वधे मोक्ष ॥ आपस्तम्ब , १, २५, ४

स्तेन प्रकीर्य केशान् सैध्रक मुसलमादाय स्कन्धेन राजानं गच्छेदनेन मा जहीति तेनैन हन्यात् । अथाप्युदाहरन्ति—स्कन्धेनादाय मुसल राजानमन्वियात् । अनेन शाधि मा राजन् क्षत्रधर्ममनुस्मरन् । शासने वा विसर्गे वा स्तेनो मुच्येत किल्बिषात ॥ बोधायनः, २, १, १५–१६

सुवर्णस्तेन प्रकीर्णकेश आर्द्रवासा आयसं मुसलमादाय राजानमुपतिष्ठेदिदं पापं मया कृतमनेन मुसलेन मा घातयस्वेति स राज्ञा शिष्टः सन् पूतो भवति ॥ शङ्ख , याज्ञ मिता., ३, २५७ ; पृ. ४०३

एव सकृत्ताडनेन राज्ञा हतो मृतः शुध्येत्, मुक्तो वा मरणाज्जीवन्नपि विशुध्येदिति यावत् । याज्ञ. मिता , ३, २५७ ; पृ. ४०३.

स्तेन प्रकीर्णकेशो मुसली राजानमियात्कर्माचक्षाण । पूतो वधमोक्षाभ्याम् ॥ गौतम , १२, ४०–४१.

[2] अकामनकृतं यत्पापं यत्—क.

[3] तत्कामादिद्विगुण—अ.

[4] cf , विहित यदकामाना कामात्तद्द्विगुणं भवेत् ॥
देवलः, याज्ञ मिता., ३, २२६ , पृ. ३७५ ; अपरार्क , पृ १०५९.

अज्ञानाकामकृते यदुक्तं ज्ञानकामकृते तद्द्विगुणम् । प्रायश्चित्तेन्दुशेखर , पृ. २.

जालसूर्यमरीचिस्थं[1] [2]त्रसरेणु ॥ १३ ॥

रजांस्यष्टौ लिक्षा ॥ १४ ॥

तास्तिस्रो राजसर्षप ॥ १५ ॥

ते[3] त्रयो गौर· ॥ १६ ॥

षट्कं यवमध्यमः[4] ॥ १७ ॥

ते[5] त्रय· कृष्णल· ॥ १८ ॥

पञ्च ते माष ॥ १९ ॥

ते षोडश सुवर्ण[6] इति[7] ॥ २० ॥

[1] बालसूर्यमरीचिस्थ—क

[2] त्रसरेणुरजोऽस्याष्टौ वा तिस्रो राजसर्षप·—अ, त्रसरेणुरजास्यष्टौ तास्तिस्रो राजसर्षप·—क

[3] ते—omitted by अ

[4] षण्मयममध्यमः—क, षट्क यवमध्यस्थम्—अ.

[5] ते—omitted by अ.

[6] सुवर्ण—अ

[7] Compare sūtras 13 to 20 with the following

जालसूर्यमरीचिस्थं त्रसरेणू रज· स्मृतम् ।
तेऽष्टौ लिक्षा तु तास्तिस्रो राजसर्षप उच्यते ॥
गौरस्तु ते त्रय षट् ते यवो मध्यस्तु ते त्रय ।
कृष्णल पञ्च ते माषस्ते सुवर्णस्तु षोडश ॥ याज्ञवल्क्यः, १, ३६२–३६३.
जालान्तरगते भानौ यत्सूक्ष्मं दृश्यते रज. ।
प्रथमं तत्प्रमाणाना त्रसरेणु प्रचक्षते ॥
त्रसरेणवोऽष्टौ विज्ञेया लिक्षैका परिमाणत ।
ता राजसर्षपस्तिस्रस्ते त्रयो गौरसर्षप· ॥
सर्षपा· षट् यवो मध्यस्त्रियवं त्वेककृष्णलम् ।
पञ्चकृष्णलको माषस्ते सुवर्णस्तु षोडश ॥ मनु, ८, १३१–१३४.

[1]तन्मात्रहरणं महापातकम्[2] ॥ २१ ॥

इति द्वितीयप्रश्ने सप्तमोऽध्यायः

अष्टमोऽध्यायः

कामतो गुरुतल्पगामी सवृषणं शिश्नं [3]परिवास्याञ्जलावाधाय दक्षिणा [4]दिशमनावृत्ति व्रजेत् ॥ १ ॥

ज्वलिता वा सूर्मि परिष्वज्य समाप्नुयात्[5] ॥ २ ॥

[1] तन्मात्रहरणं महापातकमिति—क, तस्मात्तस्य हरण महापातकम्—अ

[2] cf, अत षोडशमाषात्मकसुवर्णपरिमितहेमहरण एव महापातकित्व तन्निमित्तं मरणान्तिकादिप्रायश्चित्तविधानं च। द्वित्रिमाषात्मकहेमहरणं तु क्षत्रियादिहेमहरणवदुपपातकमेवेति युक्तम्। किं च सुवर्णान्न्यूनपरिमाणहेमहरणे प्रायश्चित्तान्तरोपदेशात्तत्परिमाणस्यैव हेम्नो हरणे मरणान्तिकादिप्रायश्चित्तमिति युक्तम् ॥ याज्ञ मिता., ३, २५७, पृ ४०४.

[3] परिवास्याञ्जलावादाय—क

[4] दिशमनावृत्तिर्व्रजेत्—अ

[5] Compare sūtras 1 to 2 with the following.

तप्तेऽय·शयने सार्धमायस्या योषिता स्वपेत्।
गृहीत्वोत्कृत्य वृषणौ नैर्ऋत्यां चोत्सृजेत्ततुम् ॥ याज्ञवल्क्य., ३, २५९
गुरुतल्प्यभिभाष्यैनस्तप्ते स्वप्यादयोमये।
सूर्मि ज्वलन्ती स्वाश्लिष्यन्मृत्युना स विशुध्यति ॥
स्वयं वा शिश्नवृषणावुत्कृत्याधाय चाञ्जलौ।
नैर्ऋतीं दिशमातिष्ठेदानिपातादजिह्मग. ॥ मनु:, ११, १०३–१०४

गुरुतल्पगामी सवृषणं शिश्नं परिवास्याञ्जलावाधाय दक्षिणा दिशमनावृत्ति व्रजेत्। ज्वलिता वा सूर्मि परिष्वज्य समाप्नुयात् ॥ आपस्तम्ब, १, २५, १–२

तप्ते लोहशयने गुरुतल्पग शयीत। सूर्मि वाश्लिष्येज्ज्वलन्तीम्। लिङ्गं वा सवृषणमुत्कृत्याञ्जलावाधाय दक्षिणाप्रतीची व्रजेदजिह्ममाशरीरनिपातनात्। मृत. शुध्येत् ॥ गौतम, २३, ९–११.

अकामतः सापत्न्यमातृगमने द्वादशवार्षिकं चरेत्[1] ॥ ३ ॥

गुरुतल्पसमे[2] चण्डालादिगमने नववार्षिकं कामतः[3] ॥ ४ ॥

अकामतश्चेच्चान्द्रायणद्वयम्[4] ॥ ५ ॥

एतच्च सकृद्गमने[5] ॥ ६ ॥

तत्र चेदं 'तप्तेऽयःशयने सार्धमायस्या' इत्याद्युक्तं मरणान्तिकं प्रायश्चित्तद्वयम्। तच्च जनन्यामकामकृते। तत्सपत्न्या तु सवर्णायामुत्तमवर्णाया च कामकृते द्रष्टव्यम् ॥

पितृभार्यां तु विज्ञाय सवर्णां योऽधिगच्छति।
जननी चाप्यविज्ञाय ना मृतः शुद्धिमाप्नुयात् ॥

इति षट्त्रिंशन्मते ऽभिधानात् ॥ याज्ञ मिता, ३, २५९, पृ ४०८

[1] cf., यत्तु शङ्खेन द्वादशवार्षिकमुक्तम्·

अधःशायी जटाधारी पर्णमूलफलाशनः।
एककाल समश्नीत वर्षे तु द्वादशे गते ॥
रुक्मस्तेयी सुरापश्च ब्रह्महा गुरुतल्पगः।
व्रतेनैतेन शुध्यन्ति महापातकिनस्त्विमे ॥ १७, १–३

इति, तत्समवर्णोत्तमवर्णपितृदारगमने, अकामकृते वा द्रष्टव्यम् ॥ याज्ञ मिता, ३, २५९, पृ. ४०९

[2] गुरुतल्पसम—अ.

[3] cf, रेतःसेक स्वयोनीषु कुमारीष्वन्त्यजासु च।
सख्युः पुत्रस्य च स्त्रीषु गुरुतल्पसमं विदुः ॥ मनु., ११, ५८.
अतिदिष्टेषु सर्वत्र पादोनव्रतमाचरेत् ॥ उशनाः, हेमाद्रि., प्रायश्चित्तकाण्डम्. पृ.९९६.

[4] cf, अज्ञानतश्चान्द्रायणद्वयं कुर्यात् ॥ विष्णु., ५३, ६.
चण्डालपुल्कसाना च भुक्त्वा गत्वा च योषितम्।
कृच्छ्राब्दमाचरेज्ज्ञानादज्ञानादैन्दवद्वयम् ॥ यमः, श्लो. २८.

[5] cf., यदा पुनर्ज्ञानतोऽज्ञानतो वा चण्डालाद्या. सकृद्गच्छति तदा—
चण्डालपुल्कसानां तु भुक्त्वा गत्वा च योषितम्।
कृच्छ्राब्दमाचरेज्ज्ञानादज्ञानादैन्दवद्वयम् ॥

इति यमाद्युक्त संवत्सर कृच्छ्रानुष्ठानं चान्द्रायणद्वयं यथाक्रमेण द्रष्टव्यम् ॥ याज्ञ. मिता., ३, २६०, पृ. ४११–४१२.

अत्यन्ताभ्यासे[1] त्वग्निप्रवेशः[2] ॥ ७ ॥

धान्याना् हरणे कृच्छ्रम्[3] ॥ ८ ॥

तिलानामैन्दवम् ॥ ९ ॥

रत्नाना चान्द्रायणम् ॥ १० ॥

ऋणानामनपाकरणे[4] सति सामर्थ्येऽनाहिताग्निताया चान्द्रायणम्[5] ॥ ११ ॥

[6]लाक्षालवणमधुमासतैलक्षीरदधिघृततक्रचर्मगन्धवासोर्णाकेशकेसरिभूधेनुवेश्माश्म[7]शस्त्रविक्रये चान्द्रायणं धेनुचतुष्टयं च[8] ॥ १२ ॥

[1] संतताभ्यासे—अ, त्वत्यन्ताभ्यासे—क

[2] cf, तथा—

चण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च ।
पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति ॥ ११, १७५.

इति चण्डालादिसाम्यं प्रतिपादयता मनुनापि कामतोऽत्यन्ताभ्यासे मरणान्तिकं दर्शितम् ।
.. मरणान्तिक चात्राग्निप्रवेशनम् । याज्ञ मिता., ३, २६०, पृ. ४११, ४१२.

[3] cf., धान्यान्नधनचौर्याणि कृत्वा कामाद्द्विजोत्तमः ।
स्वजातीयगृहादेव कृच्छ्राब्देन विशुध्यति ॥ मनु॰, ११, १६२.
धान्यधनापहारी च कृच्छ्रमब्दम् । विष्णु., ५२, ५.

[4] ऋता मनसाकरणे—अ, मृन्मयानामनपाकरणे—क.

[5] Compare with sūtras 9 to 11
[गोवधो व्रात्यता] स्तेयमृणाना चानपाक्रिया । याज्ञवल्क्य, ३, २३४.
उपपातकशुद्धि स्यादेवं चान्द्रायणेन तु ॥ याज्ञवल्क्य., ३, २६५
कृतदारो गृहे ज्येष्ठो यो नादध्यादुपासनम् ।
चान्द्रायणं चरेद्वर्ष प्रतिमासमहोऽपि वा ॥
काष्र्णाजिनिः, याज्ञ. मिता., ३, २६५, पृ. ४२६.

[6] क्षार for लाक्षा—अ.

[7] वस्त्र for शस्त्र—अ.

[8] cf, सर्वान् रसानपोहेत कृतान्नं च तिलैः सह ।
अश्मनो लवण चैव पशवो ये च मानुषाः ॥

[1]अत्यन्ताभ्यासे [2]चोपनयेत्[3] ॥ १३ ॥

ये ब्राह्मणाधमा यद्द्रव्य[4] गर्हितेन [5]कर्मणार्जयन्ति [6]तद्द्रव्योत्सर्गेण [7]शुध्यन्ति ते जप्येन तपसा वा[8] ॥ १४ ॥

भृतकाध्ययने[9] च त्रिरात्रं पयसा [10]ब्राह्मी[11]सुवर्चला पिबेत्[12] ॥

अप· शस्त्र विषं मास सोमं गन्धाश्च सर्वश· ।
क्षीरं क्षौद्र दधि घृत तैल मधु गुड कुशान् ॥ मनु , १०, ८६ and ८८.

मासलवणलाक्षाक्षीरविक्रयी चान्द्रायण कुर्यात् ॥ विष्णु , ५४, २१

लाक्षालवणमधुमासतैलक्षीरदधितक्रघृतगन्धचर्मवाससामन्यतमविक्रये चान्द्रायणम् । तथा—ऊर्णाकेशकेसरिभूधेनुवेश्माश्मशस्त्रविक्रये च ॥ हारीत , याज्ञ मिता., ३, २६५ ; पृ ४२६

[1] अत्यन्ताभ्यासित चोपनयने—क.

[2] चोपनयनम्—अ

[3] cf , त च भूयश्चोपनयेत् ॥ विष्णुः, ५४, २२.

[4] इदं ब्राह्मणाधमाय द्रष्टव्यं—अ , ये ब्राह्मणाधमाय द्रव्य—क.

[5] कर्मणार्जयति—अ

[6] तद्द्रव्यस्य उत्सर्गेण—क.

[7] शुध्यति—क.

[8] cf , यद्गर्हितेनार्जयन्ति कर्मणा ब्राह्मणा धनम् ।
तस्योत्सर्गेण शुध्यन्ति जप्येन तपसैव च ॥
मनु , ११, १९३ ; विष्णु , ५४, २८.

[9] भृतकाध्ययनेन—क.

[10] ब्राह्मणी—अ, क.

[11] सुवर्चला—omitted by क

[12] cf , तथा 'भृतकाध्यापकभृतकाध्यापितयोश्च पयसा ब्रह्मसुवर्चला पिबेत्' इत्यधिकृत्य विष्णुनोक्तम्—

भृतकाध्यापन कृत्वा भृतकाध्यापितस्तथा ।
अनुयोगप्रदानेन त्रीन् पक्षान्नियत पिबेत् ॥ इति, याज्ञ. मिता., ३, २६५ , पृ. ४२७;

भृतकाध्ययनाध्यापितयोर्हारीत आह—

भृतकाध्यापनं कृत्वा भृतकाध्यापितश्च य. ।
अनुयोगप्रदानेन त्रीन् पक्षान्नियत: पिबेत् ॥ परा. मा. प्रा , पृ. ४३४.

जातिमात्रब्राह्मणीगमने[1] कामतो[2] वार्षिकम्[3] ॥ १६ ॥

श्रोत्रियभार्यागुणवतीगमने[4] त्रैवार्षिकम्[5] ॥ १७ ॥

एतत्सर्वमृतुकालविषयम्[6] ॥ १८ ॥

अनृतौ तु त्रैमासिकमेव[7] ॥ १९ ॥

द्वित्रिव्यभिचारिब्राह्मणीगमने प्राजापत्यद्वयम् ॥ २० ॥

अकामतस्त्वेक[8] प्राजापत्यम्[9] ॥ २१ ॥

[1] जातिमात्रब्राह्मण्या गमने—अ.

[2] कामतो वा—अ

[3] cf, खट्वाङ्गी चीरवासा वा श्मश्रुलो विजने वने ।
प्राजापत्य चरेत्कृच्छ्रमब्दमेक समाहित ॥ मनुः, ११, १०५.

[4] शूद्रीयभार्यागुणवतीगमने—क

[5] cf., द्वे परदारे । त्रीणि श्रोत्रियस्य ॥ गौतम , २२, ३१–३२

[6] Compare sūtras 16 to 18 with the following
तत्रेय व्यवस्था । ऋतुकाले कामतो जातिमात्रब्राह्मणीगमने वार्षिक प्राकृत ब्रह्मचर्यम् । तस्मिन्नेव काले कर्मसाधनत्वादिगुणशालिन्या ब्राह्मण्या गमने द्वे वर्षे प्राकृत ब्रह्मचर्यम् । तादृश्या एव श्रोत्रियभार्याया गमने त्रीणि वर्षाणि प्राकृतं ब्रह्मचर्यम् । यद्वा श्रोत्रियपत्न्या गुणवत्या ब्राह्मण्या त्रैवार्षिकम् ॥ याज्ञ मिता , ३, २६५ ; पृ. ४२७.

[7] cf , अनृतुकाले तु जातिमात्रब्राह्मण्या कामतो गमने मानवं त्रैमासिकम् ॥ याज्ञ. मिता , ३, २६५ ; पृ. ४२७–४२८
चान्द्रायणं वा त्रीन् मासानभ्यसेन्नियतेन्द्रियः ॥ मनु , ११, १०६

[8] अकामकर्तृक—अ ; अमतस्यैक—क

[9] Compare sūtras 20 and 21 with the following
'ब्राह्मणश्चेद प्रेक्षापूर्वक ब्राह्मणदारानभिगच्छेत्तन्निवृत्तधर्मकर्मण कृच्छ्रो ऽनिवृत्तधर्मकर्मणोऽतिकृच्छ्रः' इति तद्ब्राह्मणभार्याया शूद्राया द्रष्टव्यम् । द्विजातिस्त्रीषु वा विप्रोढासु द्वित्रिर्व्यभिचरितासु अबुद्धिपूर्वगमने वा । तथा च संवर्तः—' विप्रामस्वजना गत्वा प्राजापत्यं समाचरेत्' (श्लो. १५५) इति । कामतस्तु—
राज्ञीं प्रव्रजिता धात्री साध्वीं वर्णोत्तमामपि ।
कृच्छ्रद्वय प्रकुर्वीत सगोत्रामभिगम्य च ॥ (श्लो ३६)
इति यमोक्त कृच्छ्रद्वयं द्रष्टव्यम् ॥ याज्ञ. मिता., ३, २६५, पृ. ४२८.

चतुर्व्यभिचारे[1] स्वैरिणी भवति[2] ॥ २२ ॥

तद्गमने त्रिरात्रोपोषणं घृतपात्रदानं [3]च[4] ॥ २३ ॥

पञ्चव्यभिचारे[5] बन्धकी[6] ॥ २४ ॥

तद्गमने किंचिद्दद्यात्[7] ॥ २५ ॥

अष्टमुष्टि भवेत्किञ्चिदिति[8] ॥ २६ ॥

विधवां व्रतस्थां गत्वा संवत्सरं चरेत्[9] ॥ २७ ॥

गर्भकरणे द्विगुणम्[10] ॥ २८ ॥

इति द्वितीयप्रश्नेऽष्टमोऽध्यायः

---

[1] चतुर्व्यभिचारी—क

[2] cf., चतुर्थे स्वैरिणी प्रोक्ता पञ्चमे बन्धकी भवेत् ॥ स्मृत्यन्तरे, याज्ञ. मिता, पृ. ४२८; परा. मा. प्रा, पृ २७०.

[3] च—omitted by क

[4] cf, स्वैरिण्या तु वृषल्यामवकीर्ण. सचैलस्नात उदकुम्भं दद्यात् ॥ शङ्खलिखितौ, याज्ञ. मिता, पृ. ४२८; परा मा प्रा, पृ. २६९; स्मृ. मु., पृ. ८८८.

[5] पञ्चव्यभिचारी—अ, पञ्चमव्यभिचारी—क.

[6] cf, चतुर्थे स्वैरिणी प्रोक्ता पञ्चमे बन्धकी भवेत् ॥ स्मृत्यन्तरे, याज्ञ. मिता., ३, २६५, पृ. ४२८.

[7] cf., ब्राह्मणीं बन्धकीं गत्वा किंचिद्दद्याद्द्विजातये ॥ षट्त्रिंशन्मते, याज्ञ. मिता., ३, २६५; पृ ४२८; परा मा. प्रा, पृ २७८; षड्विंशे, स्मृ. मु., पृ. ८८८

[8] cf., अष्टमुष्टि भवेत्किंचित् किंचिदष्टौ च पुष्कलम् ।
पुष्कलानि च चत्वारि आढक परिकीर्तितः ॥ प्रायश्चित्तेन्दुशेखरः, पृ. ३९.

[9] cf, विधवागमने कृच्छ्रमहोरात्रसमन्वितम् ।
व्रतस्थागमने कृच्छ्रं सपादं तु समाचरेत् ॥ चतुर्विंशतिमते, परा मा प्रा, पृ. २७१, स्मृ. मु., पृ ८८८.

[10] cf., गमने तु व्रत यत्स्याद्गर्भे तद्द्विगुणं भवेत ॥ उशनाः, याज्ञ मिता., ३. २६५; पृ. ४२८; परा. मा. प्रा., पृ. २७०; स्मृ. मु., पृ. ८८८.

नवमोऽध्यायः

कामतः [1]स्वैरिशूद्रागमने सचैलस्नात उदकुम्भं दद्यात् ॥ १ ॥

वैश्यागमने[2] चतुर्थकालाहारो[3] ब्राह्मणान् भोजयेत् ॥ २ ॥

क्षत्रियागमने[4] त्रिदिनमुपोष्य [5]यवाढकं दद्यात्[6] ॥ ३ ॥

तत्र गर्भोत्पत्तौ द्विगुणं चरेत्[7] ॥ ४ ॥

[8]शूद्रश्चेद्ब्राह्मणीमधिगच्छेद्वीरणपत्रैर्वेष्टयित्वा शूद्रमग्नौ पातयेत् ॥५॥

ब्राह्मण्याः शिरसि वपनं [9]कारयित्वा सर्पिषाभ्यज्य नग्ना खरमारोप्य महापथमनुव्राजयेत् पूता भवतीति विज्ञायते[10] ॥ ६ ॥

[1] स्वैरिशूद्रानुगमने—अ.

[2] वेश्यागमने—क.

[3] चतुर्थकालहारो—अ ; चतुर्थकालापहारो—क.

[4] क्षत्रियानुगमने—अ , क्षत्र्यागमने—क.

[5] यवादिकं—अ.

[6] Compare sūtras 1 to 3 with the following

स्वैरिण्या वृषल्यामवकीर्णः सचैलस्नात उदकुम्भं दद्यात् । वैश्यायां चतुर्थकालाहारो ब्राह्मणान् भोजयेत् । क्षत्रियाया त्रिरात्रोपोषितो यवाढकं दद्यात् ॥ शङ्खलिखितौ, परा. मा. प्रा., पृ २६९ ; स्मृ. मु., पृ. ८८८ ; Vijñānes'vara cites these *sūtras* with some additions in his commentary on याज्ञवल्क्य ३, २६५ (p. 428) and attributes them to शङ्ख and to शङ्खलिखित on p. 440

[7] cf., गमने तु व्रतं यत्स्यादूर्भे तद्द्विगुणं भवेत् ॥ उशना, याज्ञ. मिता., ३, २६५ ; पृ. ४२८ ; परा. मा. प्रा., पृ. २७० ; स्मृ. मु., पृ. ८८८.

[8] शूद्रश्चेद्ब्राह्मणीगमने वीरणपत्रैर्वेष्टयित्वा—अ.

[9] कृत्वा सर्वेषामधिगच्छेदभ्यज्य नग्नाम्बरीमारोप्य महारथमनुव्राजयेत् पूतो—अ

[10] Compare sūtras 5 and 6 with the following

शूद्रश्चेद्ब्राह्मणीमभिगच्छेद्वीरणपत्रैर्वेष्टयित्वा शूद्रमग्नौ प्रास्येत् । ब्राह्मण्याः शिरसि वपनं कारयित्वा नग्नां कृष्णं खरमारोप्य महापथमनुसंव्राजयेत् पूता भवतीति विज्ञायते ॥ वसिष्ठः, २१, १–२.

[1]वैश्यश्चेद्ब्राह्मणीमधिगच्छेद्रोहितदर्भैर्वेष्टयित्वा वैश्यमग्नौ [2]प्रास्येत ॥ ब्राह्मण्या [3]गौरखरारोहणम् ॥ ८ ॥

[4]क्षत्रियश्चेद्ब्राह्मणीमधिगच्छेच्छरपत्रैर्वेष्टयित्वा क्षत्रियमग्नौ [5]प्रास्येत ॥ ब्राह्मण्याः [6]खरारोहणं पूर्ववत्[7] ॥ १० ॥

[8]पाणिधृतभार्याया मुखे मैथुनं यश्चरेत् तस्येह निष्कृतिर्नास्तीत्येवं प्रजापतिराह[9] ॥ ११ ॥

रजस्वलायाः कामतः सकृद्गमने सप्तरात्रव्रतम्[10] ॥ १२ ॥

अभ्यासे त्वतिकृच्छ्रं[11] तत्र धेनुद्वय च[12] ॥ १३ ॥

[1] वैश्यश्च for वैश्यश्चेत्—अ.
[2] प्रास्य for प्रास्येत्—अ.
[3] गौरखरमारोहणम्—अ.
[4] क्षत्रियश्च for क्षत्रियश्चेत्—अ.
[5] प्रास्य for प्रास्येत्—अ.
[6] खरारोपणं—क.

[7] Compare sūtras 7 to 10 with the following
वैश्यश्चेद्ब्राह्मणीमभिगच्छेच्छरपत्रैर्वेष्टयित्वा वैश्यमग्नौ प्रास्येत् । ब्राह्मण्याः शिरसि वपन कारयित्वा नग्ना गौरखरमारोप्य महापथमनुसंव्राजयेत् पूता भवतीति विज्ञायते । राजन्यश्चेद्ब्राह्मणीमभिगच्छेच्छरपत्रैर्वेष्टयित्वा राजन्यमग्नौ प्रास्येत् ब्राह्मण्याः शिरसि वपन कारयित्वा सर्पिषा समभ्यज्य नग्ना श्वेत खरमारोप्य महापथमनुसंव्राजयेत् पूता भवतीति विज्ञायते ॥ वसिष्ठः, २१, ३–५

[8] पाणिगृहीताया भार्याया—क

[9] cf., यो विप्रः पुंसि ससर्गं स्वदारेषु रतिं मुखे ।
तस्येह निष्कृतिर्नास्ति पुनः सस्करण विना ॥ मार्कण्डेयः, हेमाद्रिः, प्रा., पृ. ३५०.
यस्तु ब्राह्मणो धर्मपत्नीमुखे मैथुन सेवेत स दुष्यति । प्राजापत्येन शुध्यति ॥ उशना, परा. मा. प्रा., पृ. २७१ ; स्मृ मु , पृ. ८९१

[10] cf., अमानुषीषु पुरुष उदक्यायामयोनिषु ।
रेतः सिक्त्वा जले चैव कृच्छ्रं सांतपनं चरेत् ॥ मनुः, ११, १७३.

[11] अभ्यसेत्प्रतिकृच्छ्र—अ ; अभ्यसेत्त्वतिकृच्छ्रं—क.

[12] cf., रजस्वला तु यो गच्छेद्गर्भिणीं पतितां तथा ।
तस्य पापविशुध्यर्थमतिकृच्छ्रो विशोधकः ॥ संवर्तः, श्लो. १६५.

श्वमार्जार[1]गोधामण्डूक[2]नकुलसर्पछुच्छुन्दरीमूषकान्[3] हत्वा कृच्छ्रं द्वादशरात्रं[4] चरेत् किंचिद्द्यात्कामतः[5] ॥ १४ ॥

अनुक्तनिष्कृतीनामस्थिमतां कृकलासादीनां सहस्रं हत्वानस्थिमतां जलूकादीनां शकटपूर्णपरिमितं हत्वा तप्तकृच्छ्रार्धं[6] धेनुद्वयं दद्यात्[7] ॥१५॥

[1] मार्जाल for मार्जार—क.

[2] नकुल cited twice by क.

[3] मूषक्यो for मूषकान्—अ

[4] कृच्छ्रद्वादशरात्रं—क.

[5] cf, श्वमार्जारनकुलसर्पदहरमूषकान् हत्वा कृच्छ्रं द्वादशरात्रं चरेत् किंचिद्द्यात् ॥ वसिष्ठः, २१, २७.

यत्पुनर्वसिष्ठेनोक्तम्—' श्वमार्जार etc ' इति तत्कामतोऽभ्यासविषयम् ॥ याज्ञ. मिता., ३, २७०.

मार्जारगोधानकुलमण्डूकांश्च पतत्रिणः ।
हत्वा त्र्यहं पिबेत्क्षीरं कृच्छ्रं वा पादिकं चरेत् ॥ याज्ञवल्क्य., ३, २७०.

इदं च प्रत्येकवधविषयम् । समुदितवधे तु—

मार्जारनकुलौ हत्वा चाषं मण्डूकमेव च ।
श्वगोधोलूककाकांश्च शूद्रहत्याव्रतं चरेत् ॥

इति मनूक्तं (११, १३१) षाण्मासिकं द्रष्टव्यम् ॥ याज्ञ. मिता. ३, २७०.

मण्डूकनकुलकाकबिम्बदहरमूषकश्वहिंसासु च । गौतम., २२, २१

[6] तप्तकृच्छ्रार्थं—क.

[7] cf, अस्थन्वतां सहस्रं हत्वा । अनस्थिमतामनडुद्भारे च ॥ गौतम.,२२,२२-२३.

अत्र बुद्धिपूर्वे शूद्रहत्याप्रायश्चित्तम् । नेतरत्रैदिति द्रष्टव्यम् ॥ मस्करी.

अस्थिमतां सहस्रं तु तथानस्थिमतामनः । याज्ञवल्क्यः, ३, २६९.

अस्थिमतां प्राणिनां कृकलासप्रभृतीनामनुक्तनिष्कृतीनां सहस्रं हत्वा अनस्थिमतां च यूकमत्कुणदंशमशकप्रभृतीनामनः शकटं तत्परिपूर्णमात्रं हत्वा शूद्रहत्याव्रतं षाण्मासिकं प्राकृतं ब्रह्मचर्यं चरेद्दश धेनूर्वा दद्यात् ॥ याज्ञ. मिता, ३, २६९

अस्थिमतां तु सत्वानां सहस्रस्य प्रमापणे ।
पूर्णे चानस्यनस्थ्नां तु शूद्रहत्याव्रतं चरेत् ॥ मनुः, ११, १४०.

वैदिककर्मार्थव्यतिरेकेण [1]वृक्षगुल्मलतादीना छेदने गायत्रीशतं जपेत्[2] ॥ १६ ॥

कृष्यर्थे [3]लाङ्गलार्थं छेदने न दोषः[4] ॥ १७ ॥

काकगृध्रादिपक्षिभिर्दष्ट पुरुषो[5]ऽन्तर्जले प्राणायामत्रयं कृत्वा घृतं प्राश्य विशुध्यति नाभेरधोदेशे[6] ॥ १८ ॥

ऊर्ध्वदेशे तु द्विगुणं भवेत् ॥ १९ ॥

[1] वृक्षगुल्मलताना—अ.

[2] cf., वृक्षगुल्मलतावीरुच्छेदने जप्यमृक्शतम् । याज्ञवल्क्य·, ३, २७६.

फलदाना तु वृक्षाणा छेदने जप्यमृक्शतम् ।
गुल्मवल्लीलताना च पुष्पिताना च वीरुधाम् ॥ मनुः, ११, १४२.

फलदाना आम्रपनसादिवृक्षाणा गुल्मादीना च यज्ञाद्यदृष्टार्थं विना छेदने ऋचा गायत्र्यादीना शतं जप्तव्यम् ॥ याज्ञ. मिता , ३, २७६.

ओषध्यः पशवो वृक्षास्तिर्यञ्च पक्षिणस्तथा ।
यज्ञार्थं निधन प्राप्ताः प्राप्नुवन्त्युच्छ्रितीः पुनः ॥ विष्णु , ५१, ६३

[3] लाङ्गलार्थच्छेदने दोष —अ

[4] cf , फलपुष्पोपगान् पादपान्न हिंस्यात् । कर्षणकरणार्थं चोपहन्यात् ॥ वसिष्ठ., १९, ११–१२.

[5] काकगृध्रादिपक्षिभिर्दष्टपुरुषो—क.

[6] cf., पुंश्चलीवानरखरैर्दष्टश्वोष्ट्रादिवायसैः ।
प्राणायामं जले कृत्वा घृतं प्राश्य विशुध्यति ॥ याज्ञवल्क्यः, ३, २७७.
श्वसृगालखरैर्दष्टो ग्राम्यैः क्रव्याद्भिरेव च ।
नराश्वोष्ट्रवराहैश्च प्राणायामेन शुध्यति ॥ मनुः, ११, १९९.

Also compare वसिष्ठ, २३, २६, बोधायन, १, ५, १२६ and विष्णु, ५४, १९.

मस्तके [1]तु चतुर्गुणम्[2] ॥ २० ॥

इति द्वितीयप्रश्ने नवमोऽध्यायः

दशमोऽध्यायः

श्वजम्बूकरासभैर्दष्टा रजस्वला [3]पञ्चरात्रं निराहारा पञ्चगव्येन शुध्यति[4]॥१॥

द्विगुणादि पूर्ववत[5] ॥ २ ॥

श्वादिभिर्गलितमवलीढं प्रदेशमद्भिः प्रक्षाल्याग्नौ[6] निष्टपनं कुर्यात्तेन शुद्धिर्भवति[7] ॥ ३ ॥

[1] तु—omitted by क.

[2] Compare sūtras 19 and 20 with the following

नाभेरूर्ध्वं तु दष्टस्य तदेव द्विगुणं भवेत् ।
स्यादेतत्त्रिगुणं वक्त्रे मस्तके तु चतुर्गुणम् ॥ अङ्गिराः, याज्ञ मिता., ३, २७७ ; पृ. ४३७ ; परा. मा. प्रा , पृ. ५५

[3] पञ्चरात्रनिराहारा—अ.

[4] cf , रजस्वला यदा दष्टा शुना जम्बुकरासभैः ।
पञ्चरात्र निराहारा पञ्चगव्येन शुध्यति । पुलस्त्यः, याज्ञ. मिता , ३, २७७ ; पृ. ४३८ ; परा. मा. प्रा., पृ. ५५, [व्यास., परा. मा. प्रा., पृ. १२६].

[5] cf., ऊर्ध्वं तु द्विगुणं नाभेर्वक्त्रे तु त्रिगुणं तथा ।
चतुर्गुणं स्मृतं मूर्ध्नि दष्टेऽन्यत्राप्लुतिर्भवेत् ॥ पुलस्त्यः, याज्ञ. मिता., ३, २७७ ; पृ. ४३८ ; परा. मा. प्रा., पृ. ५५–५६.

[6] श्वादिभिर्विगलितमपविद्ध प्रदेशमद्भिः सम्यक् प्रक्षाल्याग्नौ—अ

[7] cf., शुना घ्रातावलीढस्य दन्तैर्विदलितस्य च ।
अद्भिः प्रक्षालन प्रोक्तमग्निना चोपचूलनम् ॥ मनुः, ११, १९९.
शुना घ्रातावलीढस्य नखैर्विलिखितस्य च ।
अद्भिः प्रक्षालनं प्रोक्तमग्निना भूरि तापनम् ॥ पराशरः, ५, ६.

वेदोक्तकर्मपरित्यागी चान्द्रायणं चरेत ॥ ४ ॥

संवत्सरपर्यन्तं ब्राह्मणगृहे भिक्षेत[1] ॥ ५ ॥

कन्यादूषणे चान्द्रायणम् ॥ ६ ॥

आत्मनोऽर्थे क्रियारम्भ मद्यपस्त्रीनिषेवणे तदेव[2] ॥ ७ ॥

नारीणा विक्रयं कृत्वा [3]चरेच्चान्द्रायणव्रतम्[4] ॥ ८ ॥

ब्रह्मसूत्रं विना भुङ्क्ते विण्मूत्रं कुरुते गायत्र्यष्टसहस्रं प्राणायामेन शुध्यति[5] ॥ ९ ॥

ब्राह्मणीशूद्र्यो रजस्वलयोरन्योन्यस्पर्शे क्रमेण कृच्छ्रेण दानेन शुद्धि[6] ॥ १० ॥

[1] Compare sūtras 4 and 5 with the following
वेदाग्न्युत्सादी त्रिषवणस्नाय्यधःशायी संवत्सरं सकृद्भैक्षेण वर्तेत ॥ विष्णु.,५४,१३.
प्रमादाद्ब्राह्मणो लोभाद्देशकालविपर्ययात् ।
अकृत्वैतानि कर्माणि प्राजापत्यं पृथक् चरेत् ॥
हारीत , हेमाद्रि , प्रा., पृ. ५३१.
अग्निकार्यं ब्रह्मयज्ञं देवर्षिपितृतर्पणम् ।
त्यक्त्वा व्रती यदा भुङ्क्ते ज्ञानाच्चान्द्रायण चरेत् ॥
गौतम , हेमाद्रि , प्रा., पृ. ५२५.
'नास्तिक्यं व्रतलोपश्च' याज्ञवल्क्य., ३, २३६, 'उपपातकशुद्धिः स्यादेवं चान्द्रायणेन तु' याज्ञवल्क्यः, ३, २६५.

[2] Compare sūtras 6 and 7 with the following
"कन्यासंदूषणं चैव . . . . . ॥
आत्मनोऽर्थे क्रियारम्भो मद्यपस्त्रीनिषेवणम् ।" याज्ञवल्क्यः३,२३८,२३९.
उपपातकशुद्धिः स्यादेव चान्द्रायणेन तु ॥ याज्ञवल्क्यः, ३, २६५.

[3] चरेच्चन्द्रव्रतम्—क

[4] cf , नारीणा विक्रयं कृत्वा चरेच्चान्द्रायणव्रतम् ॥ चतुर्विंशतिमतम् , याज्ञ. मिता., ३, २८७; पृ. ४४७.

[5] cf , ब्रह्मसूत्रं विना भुङ्क्ते विण्मूत्र कुरुतेऽथवा ।
गायत्र्यष्टसहस्रेण प्राणायामेन शुध्यति ॥ मरीचि , याज्ञ. मिता., ३, २८१.

[6] cf., स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी शूद्रजा तथा ।
कृच्छ्रेण शुध्यते पूर्वा शूद्रा दानेन शुध्यति ॥ पराशरः, ७, १४–१५.

तस्करराजभृत्यवृक्षारोहणवृत्तिकगरदाग्निदाश्व[1]गजारोहणवृत्तिकरङ्गोपजीविगणान्नोपजीविशूद्रोपाध्यायनक्षत्रोपजीविब्रह्मोपजीविनाम ॥ ११ ॥

द्विजाना कार्येषु मूल्येन परिचारक स ब्रह्मोपजीवीत्युच्यते[2] ॥१२॥

देवलकपुरोहितधूर्त[3]कितवकूटकारापत्यमनुष्यपशुविक्रयिणा[4] सर्वस्वत्यागानन्तरं वार्षिकं कृत्वा पितृतर्पणं कृत्वा धेनूर्दद्यात[5] ॥ १३ ॥

ब्राह्मणस्य समुद्रयाने[6] त्रैवार्षिकम[7] ॥ १४ ॥

हिरण्यदानं च सहस्रसंख्याकं म्लेच्छादिभ्यो[8] न गृह्णीयात ॥१५॥

गृह्णीयाच्चेद्ब्राह्मणेभ्यो दद्यात[9] ॥ १६ ॥

[1] °गजारोहणवृत्तिकरकोपजीविशूद्रोपाध्याय°—अ.

[2] cf., ब्रह्मजीवी ब्राह्मणकार्येषु (द्विजकार्येषु) मूल्येन परिचारक । याज्ञ. मिता., ३, २८८; पृ ४४९.

[3] कैतव for कितव—अ.

[4] विक्रयणं for विक्रयिणां—अ.

[5] Compare sūtras 11 and 13 with the following.

अनृतवाक तस्करो राजभृत्यो वृक्षारोपकवृत्तिर्गरदोऽग्निदोऽश्वरथगजारोहणवृत्ती रङ्गोपजीवी श्वागणिकः शूद्रोपाध्यायो वृषलीपतिर्भाण्डिको नक्षत्रोपजीवी श्ववृत्तिर्ब्रह्मजीवी चिकित्सको देवलक: पुरोहित: कितवो मद्यप· कूटकारकोऽपत्यविक्रयी मनुष्यपशुविक्रेता चेति तानुद्धरेत् समेत्य न्यायतो ब्राह्मणव्यवस्थया सर्वद्रव्यत्यागे चतुर्थकालाहारा: संवत्सरं त्रिषवणमुपस्पृशेयुस्तस्यान्ते देवपितृतर्पण गवाह्निक चेत्येवं व्यवहार्या: ॥ प्रचेताः, याज्ञ· मिता., ३, २८८; पृ· ४४९.

[6] समुद्रयोनौ—अ

[7] cf, अथ पतनीयानि । समुद्रसयान ब्राह्मणस्य . . . . . . एषामन्यतमत्कृत्वा मितभोजिनः स्युरपोऽभ्यवेयु: सवनानुकल्पम । स्थानासनाभ्या विहरन्त एते त्रिभिर्वर्षैस्तदपहन्ति पापम् ॥ बोधायन:, २, १, ४०–४१.

[8] म्लेच्छादिभोजन—अ.

[9] cf, यद्गर्हितेनार्जयन्ति कर्मणा ब्राह्मणा धनम् ।
तस्योत्सर्गेण शुध्यन्ति जप्येन तपसैव च ॥ मनुः, ११, १९३; विष्णु·, ५४, २८.

[1]सत्परिग्रहपरित्यागी [2]मर्कटः ॥ १७ ॥

अदत्तादाने[3] जम्बूकः गृध्रो द्वादश जन्मानि दश जन्मानि सूकरः श्वानयोनिशतं गत्वा जायते चण्डालेषु ॥ १८ ॥

शाल्मलं [4]शणपुष्पं [5]करनिर्मथितं दधि बहिर्वेदि पुरोडाशं जग्ध्वा नाश्नीयादहर्निशम्[6] ॥ १९ ॥

इति द्वितीयप्रश्नो दशमोऽध्यायः

एकादशोऽध्यायः

अनिर्दशाहगोमहिषीक्षीरपाने[7] षड्रात्रमभोजनम्[8] ॥ १ ॥

सर्वासा [9]द्विस्तनीनामजावर्जमेतदेव[10] ॥ २ ॥

[1] सपरिग्रहपरित्यागी—अ

[2] कर्मठः—क.

[3] श्मशाने—क.

[4] शणपुष्ट—क.

[5] करनिर्मथितदधि—अ.

[6] cf, शणपुष्प शाल्मलं च करनिर्मथितं दधि ।
बहिर्वेदि पुरोडाशं जग्ध्वा नाद्यादहर्निशम् ॥ षट्त्रिशन्मतम्, याज्ञ मिता, ३, २८९; पृ ४५२.

[7] प्राशने for पाने—अ.

[8] cf, अनिर्दशाया गोः क्षीरमौष्ट्रमैकशफ तथा ।
आविकं संधिनीक्षीर विवत्सायाश्च गो पय· ॥ मनु·, ५, ८–९
गोजामहिषीवर्ज सर्वपयांसि । अनिर्दशाहानि तान्यपि ॥ विष्णुः, ५१, ३८–३९.

[9] द्विस्तनीनामेव वर्जयेत्तदेव—अ

[10] Compare sūtras 1 and 2 with the following
अनिर्दशाहगोमहिषीक्षीरप्राशने षड्रात्रमभोजनम् । सर्वासा द्विस्तनीनां क्षीरपानेऽप्यजावर्जमेतदेव ॥ पैठीनसिः, याज्ञ. मिता., ३, २८९, पृ. ४५२.

[1]यदा भाजनस्थमन्नं [2]केशमक्षिकादिना दूषितं [3]तद्व्युदस्याप उपस्पृशेत् ॥ ३ ॥

[4]तच्चान्नं भस्मना स्पृशेत्[5] ॥ ४ ॥

शुनामुच्छिष्टं भुक्त्वा मासमेकं गवाघ्रातं काकोच्छिष्टं [6]भुक्त्वा [7]पक्षं व्रती भवेत्[8] ॥ ५ ॥

ब्राह्मणः शूद्रोच्छिष्टाशने सप्तरात्रं पञ्चगव्यं पिबेत् ॥ ६ ॥

वैश्योच्छिष्टाशने पञ्चरात्रम् ॥ ७ ॥

राजन्योच्छिष्टाशने त्रिरात्रम् ॥ ८ ॥

ब्राह्मणोच्छिष्टाशने त्वेकाहम्[9] ॥ ९ ॥

सर्वत्र सुवर्णपञ्चकं पञ्च धेनूर्दद्यात्[10] ॥ १० ॥

[1] यथाभोजनस्थमन्न—अ

[2] केशमक्षिकादूषितं—क

[3] व्युदक्योप उपस्पृशेत्—अ.

[4] This sūtra is omitted by क.

[5] Compare sūtras 3 and 4 with the following
यदा तु भाजनस्थमन्नं केशादिदूषितं भवति तदा—
अन्ने भोजनकाले तु मक्षिकाकेशदूषिते ।
अनन्तर स्पृशेदापस्तच्चान्न भस्मना स्पृशेत् ॥ प्रचेता, याज्ञ. मिता, ३, २८९; पृ. ४५४.

[6] भुक्त्वा—omitted by क

[7] पक्षव्रती भवेत्—अ; पक्षव्रत भवेत्—क.

[8] cf, शुनोच्छिष्टं तथा भुक्त्वा मासमेकं व्रती भवेत् ।
काकोच्छिष्ट गवाघ्रातं भुक्त्वा पक्षं व्रती भवेत् ॥ शङ्खः, १७, ४६.

[9] Compare sūtras 6 to 9 with the following
ब्राह्मण. शूद्रोच्छिष्टाशने सप्तरात्रम् । वैश्योच्छिष्टाशने पञ्चरात्रम् । राजन्योच्छिष्टाशने त्रिरात्रम् । ब्राह्मणोच्छिष्टाशने त्वेकाहम् ॥ विष्णु, ५१, ५०–५३.

[10] cf. हिरण्यं ब्राह्मणाय दद्याद्गा वाचार्याय ॥ गौतम., २०, १३.

7

पितुर्ज्येष्ठस्य च भ्रातुरुच्छिष्टं भोक्तव्यम्[1] ॥ ११ ॥

चण्डालपतितादीनामुच्छिष्टान्नभक्षणे[2] चान्द्रायणं विप्रः ॥ १२ ॥

क्षत्रियस्तु[3] सातपनम्[4] ॥ १३ ॥

द्विगुणसुवर्णादि पूर्ववत् ॥ १४ ॥

दीपोच्छिष्टं[5] रात्रौ [6]रथ्याहृतमभ्यङ्गशिष्टं च[7] तैलं भुक्त्वा नक्तेन शुध्यति[8] ॥ १५ ॥

यत्किंचिद्भाजने पीतशेषं[9] मुखनिःसृतं तदभोज्यम् ॥ १६ ॥

भोजने [10]चान्द्रायणमभ्यासे[11] ॥ १७ ॥

[1] cf, पितुर्ज्येष्ठस्य च भ्रातुरुच्छिष्ट भोक्तव्यम् ॥ आपस्तम्ब, १, ४, ११

[2] भोजने for भक्षणे—क　　[3] क्षत्रियस्य—अ.

[4] Compare sūtras 12 and 13 with the following
चण्डालपतितादीनामुच्छिष्टान्नस्य भक्षणे ।
चान्द्रायणं चरेद्विप्रः क्षत्र सातपनं चरेत् ॥ अङ्गिरा॰, याज्ञ मिता., ३, २८९, पृ. ४५५.
अन्त्याना भुक्तशेषं तु भक्षयित्वा द्विजातय ।
चान्द्रायण तदर्धार्ध ब्रह्मक्षत्रविशा विधिः ॥ आपस्तम्बस्मृति॰, ५, ९–१०.

[5] द्विजोच्छिष्टं—अ; विप्रोच्छिष्टं—क

[6] दध्याहृत॰—अ　　[7] च—omitted by अ.

[8] cf, दीपोच्छिष्टं तु यत्तैल रात्रौ रथ्याहृतं च यत् ।
अभ्यङ्गाच्चैव यच्छिष्ट भुक्त्वा नक्तेन शुध्यति ॥ षट्त्रिंशन्मतम्, याज्ञ. मिता, ३, २८९, पृ. ४५५.

[9] यत्किंचिद्भोजने पितृशेषं—अ.

[10] चान्द्रायणमभ्यसेत्—अ.

[11] Compare sūtras 16 and 17 with the following
पिबतः पतित तोय भोजने मुखनि सृतम् ।
अपेयं तद्विजानीयाद्भुक्त्वा चान्द्रायणं चरेत् ॥ पराशरः, ११, ४०.
पीतशेष तु यत्किंचिद्भाजने मुखनि सृतम् ।
अभोज्यं तद्विजानीयाद्भुक्त्वा चान्द्रायणं चरेत् ॥ (बृहच्छातातप)
इति तदभ्यासविषयम् ॥ याज्ञ. मिता., ३, २८९; पृ. ४५५.

अमेध्यपतित[1]चण्डालपुल्कसरजस्वलावधूतकुष्ठिकुनखिसंस्पृष्टानि [2]भुक्त्वा कृच्छ्रं चरेत् ॥ १८ ॥

[3]अकामतोऽर्धम्[4] ॥ १९ ॥

रण्डापुत्र भोजनं कुर्विति यत्रान्नं[5] दद्युस्तत्राहोरात्रोपवास[6] ॥२०॥

उत्थितस्तु यो[7] भुङ्क्ते वामकरनिर्मुक्तभाजने[8] यो भुङ्क्ते तस्य सांतपनम्[9] ॥ २१ ॥

एकपङ्क्त्युपविष्टाना [10]ब्राह्मणाना सह भोजने यद्येकोऽपि त्यजेत्पात्रं शेषमन्नं न भोजयेत ॥ २२ ॥

मोहाद्भुक्त्वा[11] कृच्छ्रं सान्तपनं चरेत्[12] ॥ २३ ॥

[1] चाण्डाल for चण्डाल—अ [2] भुक्त्वा कृच्छ्रं चरेत्—omitted by अ.

[3] This sūtra is omitted by अ.

[4] Compare sūtras 18 and 19 with the following
अमेध्यपतितचण्डालपुल्कसरजस्वलावधूतकुणिकुष्ठिकुनखिसस्पृष्टानि भुक्त्वा कृच्छ्रं चरेत् ॥ शङ्ख, याज्ञ. मिता, ३, २८९
एतत्कामकारविषयम् । अकामतोऽर्धम् ॥ याज्ञ मिता, ३, २८९; पृ. ४५५.

[5] रात्र्यादौ पुत्रभोजनं वुक्तभोजनं कुर्वीत यत्तन्न—अ

[6] cf, कुत्सित्वा वा यत्रान्नं दद्युस्तत्र प्रायश्चित्तमहोरात्रम् ॥ हारीतः, याज्ञ. मिता., ३, २८९; पृ ४५६

[7] उत्थितस्तूभयो·—अ.

[8] वाक्करनिर्मुक्तभोजने—अ, वामकरभाजने—क

[9] cf, समुत्थितस्तु यो भुङ्क्ते यो भुङ्क्ते मुक्तभाजने ।
एवं वैवस्वत प्राह भुक्त्वा सान्तपनं चरेत् ॥
षट्त्रिंशन्मतम्, याज्ञ. मिता., ३, २८९, पृ. ४५६.

[10] विप्राणां—क. [11] मोहाच्चेद्भुक्त्वा—अ.

[12] Compare sūtras 22 and 23 with the following
एकपङ्क्त्युपविष्टाना विप्राणा सह भोजने ।
यद्येकोऽपि त्यजेत्पात्र शेषमन्नं न भोजयेत् ॥
मोहाद्भुञ्जीत यस्तत्र पङ्क्तावुच्छिष्टभोजने ।
प्रायश्चित्त चरेद्विप्र कृच्छ्र सान्तपनं तथा ॥ पराशर·, ११, ७–८.

क्लिन्नं भिन्नं शवं कूपस्थं यदि दृश्यते तज्जलं पीत्वा त्रिरात्रं पयः पिबेत् ॥ २४ ॥

मानुषे द्विगुणम्[1] ॥ २५ ॥

चण्डालकूपभाण्डस्थं जलं कामात् पिबेत् सातपनं विप्रः ॥ २६ ॥

प्राजापत्यं क्षत्रियः ॥ २७ ॥

तदर्धं वैश्यः ॥ २८ ॥

शूद्रः पादम्[2] ॥ २९ ॥

अज्ञानात्तु [3]त्र्यहेण शुध्येत्[4] ॥ ३० ॥

[1] Compare sūtras 24 and 25 with the following

क्लिन्नं भिन्नं शवं चैव कूपस्थं यदि दृश्यते ।
पयः पिबेत्त्रिरात्रेण मानुषे द्विगुणं स्मृतम् ॥ देवलः, याज्ञ. मिता., ३, २८९; पृ. ४५६.

मृतपञ्चनखात्कूपादत्यन्तोपहताच्चोदक पीत्वा ब्राह्मणस्त्रिरात्रमुपवसेत् ॥ विष्णुः, ५४, २.

[2] Compare sūtras 26 to 29 with the following

चण्डालकूपभाण्डस्थं यो ज्ञानात्पिबते जलम् ।
प्रायश्चित्तं कथ तस्य वर्णे वर्णे विधीयते ॥
चरेत्सान्तपनं विप्र. प्राजापत्य तु भूमिपः ।
तदर्धं तु चरेद्वैश्यः पादं शूद्रस्य दापयेत् ॥ आपस्तम्बस्मृतिः, ४, १–२.

A.S.S. edition of Āpastamba reads 'योऽज्ञानात्पिबते जलम्' for 'यो ज्ञानात्पिबते जलम्' But the better reading is 'यो ज्ञानात्पिबते जलम्' and is supported by विज्ञानेश्वर who reads 'यः कामात्पिबते जलम्' and comments 'इदं च कामकारविषयम्'. *vide*, याज्ञ मिता, ३, २८९, पृ. ४५६.

[3] प्राजापत्येन—क.

[4] cf, चण्डालकूपभाण्डस्थमज्ञानादुदकं पिबेत् ।
स तु त्र्यहेण शुध्येत शूद्रस्त्वेकेन शुध्यति ॥ देवलः, याज्ञ. मिता, ३, २८९; पृ. ४५६; परा. मा. प्रा., पृ. ८५.

अन्त्यजसंबन्धादल्पजलाशये[1] कूपवत्[2] ॥ ३१ ॥

इति द्वितीयप्रश्ने एकादशोऽध्यायः

द्वादशोऽध्यायः

म्लेच्छादीना पुष्करिण्यां ह्रदे[3] चैकदेशजलं पीत्वा जानुदघ्नं [4]चेच्छुचिः ॥ १ ॥

अधस्तादशुचिः ॥ २ ॥

कामतोऽहोरात्रम् ॥ ३ ॥

अकामान्नक्तभोजी[5] ॥ ४ ॥

रजकादिभाण्डस्थं जलं[6] दधि पय· पिबेद्विजातीनां ब्रह्मकूर्चोपवासेन निष्कृतिः ॥ ५ ॥

[1] अन्त्यजं सम वाल्पजलाशये—क.

[2] cf , जलाशयेष्वथाल्पेषु स्थावरेषु वसुधरे ।
कूपवत्कथिता शुद्धिर्महत्सु न च दूषणम् ॥ विष्णु., २३, ४६.

[3] ह्रादे च जल पीत्वा जानुदघ्नं—क , ह्रदैकदेशजल पीत्वा जानुदघ्न—अ.

[4] चेच्छुद्धि —अ.

[5] Compare sūtras 1 to 4 with the following
म्लेच्छादीनां जलं पीत्वा पुष्करिण्या ह्रदेऽपि वा ।
जानुदघ्नं शुचि ज्ञेयमधस्तादशुचि स्मृतम् ॥
तत्तोयं यः पिबेद्विप्रः कामतोऽकामतोऽपि वा ।
अकामान्नक्तभोजी स्यादहोरात्रं तु कामत. ॥ आपस्तम्ब., याज्ञ मिता , ३, २८९ ; पृ. ४५६.

[6] रजकादिभाण्डस्थजलं—क.

[1]शूद्रस्य दानेनोपवासेन[2] ॥ ६ ॥

अन्त्यजैः खानितेषु[3] तटाककूपादिषु स्नात्वाचम्य पीत्वा[4] चाभ्यासे प्राजापत्यम्[5] ॥ ७ ॥

अनभ्यासे पञ्चगव्यम्[6] ॥ ८ ॥

कामतः केवलं पर्युषितं भुक्त्वा [7]त्रिरात्रं व्रतं चरेत्[8] ॥ ९ ॥

स्नेहाक्तं चेन्न दोषः[9] ॥ १० ॥

[1] शूद्रस्योपवासेन—क.

[2] Compare sūtras 5 and 6 with the following
भाण्डस्थमन्त्यजाना तु जलं दधि पय पिबेत ।
ब्राह्मण क्षत्रियो वैश्यः शूद्रश्चैव प्रमादतः ॥
ब्रह्मकूर्चोपवासेन द्विजातीना तु निष्कृति ।
शूद्रस्य चोपवासेन तथा दानेन शक्तितः ॥ पराशर, ६, ३०–३१

[3] खनितेषु—अ

[4] स्नात्वा च पीत्वा—क.

[5] cf, अन्त्यजैः खानिताः कूपास्तडागा वाप्य एव वा ।
एषु स्नात्वा च पीत्वा च प्राजापत्येन शुध्यति ॥ (आपस्तम्ब)
इति आपस्तम्बोक्तमभ्यासविषयं वेदितव्यम् ॥ याज्ञ मिता, ३, २८९, पृ. ४५७

[6] cf., श्वपाकचाण्डालपरिग्रहेषु पीत्वा जलं पञ्चगव्येन शुद्धि ।
अन्त्यैस्तु खानिता कूपास्तडागानि तथैव च ।
येषु स्नात्वा च पीत्वा च पञ्चगव्येन शुध्यति ॥
आपस्तम्बस्मृतिः, २, २ and ४.

[7] त्रिरात्रव्रतं—अ.

[8] cf, केवलानि च शुक्तानि तथा पर्युषितं च यत् ।
गुडयुक्त तथा भुक्त्वा त्रिरात्रं तु व्रती भवेत् ॥ शङ्ख., १७, ३२
'इद च कामतः' इति विज्ञानेश्वर. See याज्ञ मिता, ३, २८९, पृ ४५७
यवगोधूमविकार स्नेहाक्तं खाण्डव च वर्जयित्वा पर्युषित तत्प्राश्योपवसेत् ॥ विष्णु, ५१, ३५

[9] cf, अन्नं पर्युषितं भोज्यं स्नेहाक्तं चिरसंस्थितम् । याज्ञवल्क्यः, १, १६९
गुडशुक्त तु भक्ष्यं स्यात्ससर्पिष्कमिति स्थितिः । शङ्खः, १७, ३३

सक्तुधानादधितिलसंबद्धं[1] भोजनं स्नानं च निशि वर्जयेत्[2] ॥

यदि स्यात्[3] प्राणायामशतं कार्यम्[4] ॥ १२ ॥

यस्याग्नौ न क्रियते [5]यस्य चान्नं न दीयते तदभोज्यम्[6] ॥ १३ ॥

भुक्त्वा तूपवसेदहः[7] ॥ १४ ॥

अनिवेद्य देवपितृब्राह्मणेभ्यो वृथाकृसरपायसापूप[8]शष्कुलीर्भुक्त्वोपवासः[9] ॥ १५ ॥

[1] सक्तुधानादधितिलसबन्धं—अ, सक्तून् धाना दधितिलसबन्धं—क

[2] cf., न दिवा धाना । न रात्रौ तिलसंबन्धम् । न दधिसक्तून् । and [स्नानमाचरेत्] न रात्रौ ॥ विष्णु, ६८, २८–३०, ६४, ६.

धाना दधि च सक्तूश्च श्रीकामो वर्जयेन्निशि ।
भोजनं तिलसंबद्ध स्नान चैव विचक्षणः ॥ बृहच्छातातपः, याज्ञ मिता, ३, २८९, पृ ४५८.

[3] यदि न स्यात्—अ.

[4] प्राणायामशतं कार्यं सर्वपापापनुत्तये ।
उपपातकजातानामनादिष्टस्य चैव हि ॥ याज्ञवल्क्यः, ३, ३०५

[5] यस्य चान्न दीयते न तद्भोज्यम्—क; यस्य चान्न—अ.

[6] cf., नादत्वा । नाहुत्वा ॥ विष्णु, ६८, ३२–३३.

[7] Compare sūtras 13 and 14 with the following

यस्य चाग्नौ न क्रियते यस्य चान्नं न दीयते ।
न तद्भोज्य द्विजातीनां भुक्त्वा चोपवसेदह ॥ लिखितः, याज्ञ मिता., ३, २८९, पृ ४५८.

[8] शष्कुल्यान् for शष्कुलीः—अ.

[9] cf, [उपवसेत ।] शाल्कवृथाकृसरसयावपायसापूपशष्कुलीदेवान्नानि हवींषि च ॥ विष्णु, ५१, ३७.

वृथाकृसरसयावपायसापूपशष्कुली. ।
आहिताग्निर्द्विजो भुक्त्वा प्राजापत्य समाचरेत ॥ लिखितः

अनाहिताग्नेस्तु 'शेषेषूपवसेदहः' (मनु, ५, २०.) इत्युपवासो द्रष्टव्यः—याज्ञ. मिता, ३, २८९, पृ ४५८ 'वृथा' देवताद्युद्देशमन्तरेण साधिता । याज्ञ. मिता, १, १७३.

शूद्राणा भाजने[1] भिन्नभाजने च[2] [3]भुक्त्वाहोरात्रोपवासः पञ्च-गव्येन शुध्यति[4] ॥ १६ ॥

[5]वटार्काश्वत्थपर्णाना कुम्भीतिन्दुकपर्णयोः कोविदारकदम्ब[6]पद्मप-लाशपत्रेषु भुक्त्वैन्दवं चरेत्[7] ॥ १७ ॥

माक्षिकं [8]फाणितं शाकं गोरसं लवणं घृतं हस्तदत्तं भुक्त्वा दिन-मेकमभोजनम्[9] ॥ १८ ॥

अभ्यक्तमूत्रपुरीषकरणे श्राद्धान्नभोजने मृतसूतकशूद्रान्नभोजने[10] शूद्रैः

[1] भोजने—अ and क

[2] च—omitted by अ.

[3] भुक्त्वा सर्वत्रोपवासः—क.

[4] cf , शूद्राणा भाजने भुक्त्वा भुक्त्वा वा भिन्नभाजने ।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ॥ संवर्तः, याज्ञ. मिता., ३, २८९, पृ. ४५८
न भिन्नभाजने ॥ विष्णु , ६८, २०.

[5] वटार्काश्वत्थकुम्भीतकोदुम्बरकोविदारकदम्बपद्मपलाशपत्रेषु—क.

[6] पद्म—omitted by अ.

[7] cf , वटार्काश्वत्थपत्रेषु कुम्भीतिन्दुकपत्रयोः ।
कोविदारकदम्बेषु भुक्त्वा चान्द्रायण चरेत् ॥
पलाशपद्मपत्रेषु गृही भुक्त्वैन्दवं चरेत् ॥ स्मृत्यन्तरे, याज्ञ. मिता , ३, २८९, पृ ४५८.
वटार्काश्वत्थपत्रेषु कुम्भीतैन्दुकपात्रके ।
कोविदारकदम्बेषु न भुञ्जीयात्कदाचन ॥ हारीत , ६, १६–१७.

[8] पाचितं—अ , फाणितं=इक्षुरसविकारः ।

[9] cf , माक्षिक फाणितं शाक गोरस लवण घृतम् ।
हस्तदत्तानि भुक्त्वा तु दिनमेकमभोजनम् ॥ पराशरः, याज्ञ. मिता., ३, २८९, पृ. ४५८.

[10] अभ्यक्तमूत्रपुरीषौ विसृजतः शूद्रान्नभोजने—क.

सह [1]स्वप्ने त्रिरात्रमभोजनम्[2] ॥ १९ ॥

[3]क्षीरे लवणमुच्छिष्टे [4]घृतं रजकतीर्थेषु स्नानं ताम्रे गव्यं [5]सुरापान-समम्[6] ॥ २० ॥

गणान्नं गणिकान्नं[7] [8]विप्रप्रत्याख्यातान्नं [9]स्तेनगायकवार्धुषिकान्नं[10] [11]च [12]वर्जयेत्[13] ॥ २१ ॥

[1] स्पर्शने—अ.

[2] cf, अभ्यक्तमूत्रपुरीषकरणे मृतसूतकशूद्रान्नभोजने शूद्रैः सह स्वप्ने त्रिरात्रम-भोजनम् ॥ हारीत॰, याज्ञ मिता, ३, २८९, पृ ४५८

शूद्रान्न सूतकान्न च अभोज्यस्यान्नमेव च । पराशर, ११, ४

ब्रह्मचर्याश्रमी श्राद्धभोजने त्रिरात्रमुपवसेत् ॥ विष्णु, ५१, ४३.

[3] क्षारलवणमुच्छिष्टे—अ

[4] च घृतं—क

[5] सुरासमम्—क

[6] cf, गव्य मूत्रं तथा तक्र नालिकेरोदक तथा ।
ताम्रपात्रस्थित पीत्वा पयो लवणसयुतम् ॥
द्विजः कामात्सुरापी स्यादज्ञानाचान्द्रभक्षणम् ॥ मार्कण्डेय, हेमाद्रि॰, प्रा॰, पृ. ४१९.

ताम्रपात्रे पय पानमुच्छिष्टे घृतभोजनम् ।
दुग्ध लवणसार्ध च सद्यो गोमासभक्षणम् ॥
ब्रह्मवैवर्तपुराणे ब्रह्मखण्डे २७ अध्याये—श्लो. २२.

ताम्रपात्रस्थित गव्य क्षीर च लवणान्वितम् ।
कराग्रेणैव यद्दत्त घृत लवणमम्बु च ॥ वृद्धहारीतस्मृति॰, ९, २६६
नोच्छिष्टश्च घृतमादद्यात् ॥ विष्णु, ६८, ३६.

[7] गणिकान्न गणान्नं—क.

[8] विप्र—omitted by क.

[9] वेन for स्तेन—क.

[10] वार्धुष्यान्न for वार्धुषिकान्न—अ.

[11] च—omitted by अ

[12] ये for वर्जयेत्—क

[13] cf., गणान्नं गणिकान्नं च विदुषा च जुगुप्सितम् ।
स्तेनगायनयोश्चान्न तक्ष्णो वार्धुषिकस्य च ॥ मनु, ४, २०९–२१० .

तथाप्युदाहरन्ति ॥ २२ ॥

मृतभर्ता च या नारी रहस्यं कुरुते पतिम् ।
[1]पश्चात्प्रापयते गर्भान् सा नारी गणिका स्मृता[2] ॥ २३ ॥
तस्या अन्नं न भोक्तव्यं भुक्त्वा चान्द्रायणं चरेत्[3] ॥ २४ ॥
यस्तु जीवति चौर्येण गोसुवर्णापहारकः ।
परस्वं हरते नित्यं स विप्रो गण उच्यत[4] इति ॥ २५ ॥

इति द्वितीयप्रश्ने द्वादशोऽध्यायः

त्रयोदशोऽध्यायः

निगलेन बद्धस्य कदर्यस्य षण्डदाम्भिकचिकित्सकक्रूरमृगयुद्विषत्पतितपिशुनक्रतुविक्रयिशस्त्रविक्रय्यपविद्ध[5]मार्जारकुक्कुटादीनाम्[6] ॥ १ ॥

[1] पश्चात्प्रजायते—अ

[2] cf, अभिगच्छति या नारी बहुभि पुरुषैर्मिथ ।
व्यभिचारीति सा ज्ञेया प्रत्यक्षगणिकेति च ॥ परा मा. प्रा, पृ. २९०.

[3] cf, कदर्यस्य नृशंसस्य वेश्यायाः कितवस्य च ।
गणान्नं भूमिपालान्नमन्नं चैव श्वजीविनाम् ॥
मौञ्जिकान्नं सूतिकान्नं भुक्त्वा मासं व्रतं चरेत् ॥ शङ्खः, १७, ३९–४०

[4] गणः=शठब्राह्मणसङ्घः—कुल्लूकः, मनु, ४, २०९

[5] मारकुक्कुटानाम्—अ.

[6] cf, दीक्षितस्य कदर्यस्य बद्धस्य निगडस्य च ॥ ४, २१०
अभिशस्तस्य षण्ढस्य पुंश्चल्या दाम्भिकस्य च ॥ ४, २११
चिकित्सकस्य मृगयोः क्रूरस्योच्छिष्टभोजिनः । ४, २१२
द्विषदन्नं नगर्यन्नं पतितान्नमवक्षुतम् ॥ ४, २१३

यो लोभात् [1]पितरौ भृत्यान् पुत्रदारानात्मान[2] धर्मकृत्यं च पीडयति स कदर्य इति[3] ॥ २ ॥

यश्च न जुहोत्युचिते काले न स्नाति न ददाति [4]पितृदेवतार्चनादि न करोति स षण्ड इति ॥ ३ ॥

यस्तु [5]दम्भार्थं स्नाति जपति च स मार्जार इति[6] ॥ ४ ॥

पिशुनानृतिनोश्चान्नं क्रतुविक्रयिणस्तथा । ४, २१४
सुवर्णकर्तुर्वेणस्य शस्त्रविक्रयिणस्तथा ॥ ४, २१५ मनुः.
कदर्यबद्धचौराणां क्लीबरङ्गावतारिणाम् ।
वैणाभिशस्तवार्धुष्यगणिकागणदीक्षिणाम् ॥
चिकित्सकातुरक्रुद्धपुंश्चलीमत्तविद्विषाम् ।
क्रूरोग्रपतितव्रात्यदाम्भिकोच्छिष्टभोजिनाम् ॥
. . . . . .
शस्त्रविक्रयिकर्मारतन्तुवायश्ववृत्तिनाम् ॥
नृशंसराजरजककृतघ्नवधजीविनाम् ।
पिशुनानृतिनोश्चैव तथा चाक्रिकबन्दिनाम् ॥
एषामन्नं न भोक्तव्यं सोमविक्रयिणस्तथा ॥ याज्ञवल्क्य॰, १, १६१–१६५.

वार्धुषिककदर्यदीक्षितबन्धनिकाभिशस्तषण्ढानां च । पुंश्चलीदाम्भिकचिकित्सकलुब्धकक्रूरोग्रोच्छिष्टभोजिनां च । पिशुनानृतवादिक्षतधर्मात्मरसविक्रयिणां च । कर्मकारनिषादरङ्गावतारिवेणशस्त्रविक्रयिणां च ॥ विष्णु , ५१, ९–१०, १२, १४.

उत्सृष्टपुंश्चल्यभिशस्तानपदेश्यदाण्डिकतक्षकदर्यबन्धनिकचिकित्सकमृगय्वनिषुचार्युच्छिष्टभोजिगणविद्विषाणानाम् ॥ गौतम , १७, १५.

[1] पथिकान्—अ.

[2] पुत्रदारानात्मानं च—अ.

[3] cf., आत्मानं धर्मकृत्यं च पुत्रदारांश्च पीडयेत् ।
लोभाद्यः पितरौ भृत्यान् स कदर्य इति स्मृतः ॥ याज्ञ. मिता., १, १६१.

[4] पितृदेवतार्चनार्थिनः स षण्ड —क.

[5] डम्भार्थं—क

[6] cf , धर्मध्वजी सदा लुब्धश्छाद्मिको लोकदम्भकः ।
बैडालव्रतिको ज्ञेयो हिंस्रः सर्वाभिसन्धकः ॥ मनु॰, ४, १९५.

यः सभागताना[1] पक्षपातं समाश्रयेत्तमाहुः कुक्कुटं [2]देवा· ॥ ५ ॥

यो वा[3] स्वकर्म परित्यज्य परकर्म समाश्रयेदनापदि[4] पतितः [5]सः प्रकीर्तितः[6] ॥ ६ ॥

पितृत्यागी देवत्यागी [7]गुरूणामप्यपूजको गोब्राह्मणस्त्रीवधकृद-पविद्ध[8] इति कीर्तित· ॥ ७ ॥

आशाकरस्त्वदाता दातुश्च प्रतिषेधक. [शरणागतं यस्त्यजति स चण्डालः प्रकीर्तित.][9] ॥ ८ ॥

[1] यस्य भृत्यस्य भागवताना—अ

[2] तमाहु कुक्कुटं देवा—omitted by अ　　[3] य for यो वा—क.

[4] यो वा स्वकर्म परित्यज्य परकर्म समाश्रयेत्—omitted by अ, अनापदि—omitted by क

[5] सप्रकीर्तित·—क.

[6] cf, वरं स्वधर्मो विगुणः न पारक्य· स्वनुष्ठित· ।
परधर्मेण जीवन् हि सद्य पतति जातित ॥ मनु, १०, ९७.

[7] सुराणा for गुरूणा—अ.　　[8] °कृदपविद्ध—omitted by क

[9] Compare sūtras 3 to 8 with the following
न जुहोत्युचिते काले न स्नाति न ददाति च ।
पितृदेवार्चनाद्धीन स षण्ड परिकीर्तित ॥
दम्भार्थं जपते नित्य तप्यते च तपस्तथा ।
न परत्रार्थमित्युक्तं स मार्जारः प्रकीर्तितः ॥
सभागताना य सभ्य पक्षपात समाचरेत् ।
तमाहु. कुक्कुटं देवास्तस्याप्यन्नं विवर्जयेत् ॥
स्वधर्मं य· समुत्सृज्य परधर्मं समाश्रयेत् ।
अनापदि तु विद्वद्भि पतित. परिकीर्त्यते ॥
देवत्यागी पितृत्यागी गुरुणामप्यपूजकः ।
गोब्राह्मणस्त्रीवधकृदपविद्ध प्रकीर्तित· ॥
आशाकरस्त्वदाता च दातुश्च प्रतिषेधक· ।
शरणागतं यस्त्यजति स चण्डालः प्रकीर्तितः ॥ यमः, स्मृ मु, पृ. ४४३.

[1]एतेषामन्नमभोज्यम् ॥ ९ ॥

भुक्त्वा चान्द्रायणं चरेत्[2] ॥ १० ॥

अवलिप्तस्य मूर्खस्य दुष्टवृत्तस्याश्रद्दधानस्यान्नं यो भुङ्क्ते स भ्रूणहा भवति[3] ॥ ११ ॥

[4]यतिवानप्रस्थ[5]पाशुपतानामन्नमभोज्यम्[6] ॥ १२ ॥

[1] तेषां for एतेषा—क.

[2] Compare sūtras 1, 9 and 10 with the following

चिकित्सकस्य क्रूरस्य तथा स्त्रीमृगजीविन ।
षण्डस्य कुलटायाश्च तथा बन्धनचारिण ॥
बद्धस्य चैव चोरस्य अवीरायाः स्त्रियास्तथा ।
चर्मकारस्य वेणस्य क्लीबस्य पतितस्य च ॥
रुक्मकारस्य धूर्तस्य तथा वार्धुषिकस्य च ।
कदर्यस्य नृशंसस्य वेश्याया कितवस्य च ॥
गणान्न भूमिपालान्नमन्न चैव श्वजीविनाम् ।
मौञ्जिकान्न सूतिकान्न भुक्त्वा मास व्रत चरेत् ॥ शङ्खः, १७, ३६–४०.

मासव्रतस्य चान्द्रायणरूपत्वात् ॥ परा मा प्रा., पृ ३०८.

शङ्खेन त्वेतानेव किंचिदधिकान् पठित्वा चान्द्रायणमुक्तम् ॥ याज्ञ मिता, ३, २८९; पृ ४६०.

यत्त्वभोज्यान्ने सुमन्तुनोक्तम्—अभिशस्तपतितपौनर्भवपुंश्चल्यशुचिशस्त्रकारतैलिकचाक्रिकध्वजिसुवर्णकारलेखकलैङ्गिकषण्डबन्धकगणगणिकान्नानि चाभोज्यानि । सौनिकक्रव्यादबुरुडचर्मकारा अभोज्यान्ना अप्रतिग्राह्याश्च । अशनप्रतिग्रहयोश्चान्द्रायण चरेत् ॥ परा. मा. प्रा., पृ ३०७

[3] cf , अवलिप्तस्य मूर्खस्य दुष्टवृत्तस्य दुर्मते. ।
अन्नमश्रद्दधानस्य यो भुङ्क्ते भ्रूणहा स वै ॥ स्मृतिरत्नम् , स्मृ मु., पृ. ४४१

[4] यदि for यति—अ

[5] पतिताना for पाशुपताना—क.

[6] cf., द्वावेवाश्रमिणौ भोज्यौ ब्रह्मचारी गृही तथा ।
मुनेरन्नमभोज्यं स्यात्सर्वेषा लिङ्गिनां तथा ॥

यतिशब्देन यतिवानप्रस्थौ । लिङ्गिशब्देन पाशुपतादयः ॥ परा मा. आ, पृ. ७१६.

ये बलाद्वन्दीकृता[1] म्लेच्छचण्डालदस्युभिरशुभं[2] गवादिप्राणि-हिंसनरूपं कर्म [3]कारितास्तदुच्छिष्टभोजनं खरोष्ट्रविड्वराहामिषभक्षणं तत्स्त्रीणा [4]तथा [5]संगस्तत्स्त्रीभिश्च सह भोजनं तत्र मासोषिते द्विजातौ[6] [7]प्राजापत्यं विशोधनम्[8] ॥ १३ ॥

इति द्वितीयप्रश्ने त्रयोदशोऽध्यायः

चतुर्दशोऽध्यायः

[9]अव्रतस्यान्नमपुत्रस्यान्नं भुक्त्वा त्रिरात्रमभोजनम्[10] ॥ १ ॥

[1] यत्तु बलोद्वन्दीकृत—क.
[2] म्लेच्छचण्डालदस्युभिः सह—अ.
[3] चारिता. for कारिताः—क
[4] तदा—अ
[5] संगतः for सग —अ
[6] द्विजातौ—omitted by क.
[7] प्राजापत्यविशोधनम्—अ
[8] cf , बलाद्दासीकृता ये च म्लेच्छचण्डालदस्युभि ।
अशुभं कारिता· कर्म गवादिप्राणिहिंसनम् ॥
उच्छिष्टमार्जनं चापि तथा तस्यैव भोजनम् ।
खरोष्ट्रविड्वराहाणामामिषस्य च भक्षणम् ॥
तत्स्त्रीणा च तथा संगं ताभिश्च सह भोजनम् ।
मासोषिते द्विजातौ तु प्राजापत्य विशोधनम् ॥ देवल , १७–१९.
Vijñānes'vara attributes these verses to आपस्तम्ब. See याज्ञ मिता., ३, २८९ ; पृ ४६०–४६१.
[9] तस्यान्न for अव्रतस्यान्न—क.
[10] cf , भुक्त्वा वार्धुषिकस्यान्नमव्रतस्यासुतस्य च ।
शूद्रस्य च तथा भुक्त्वा त्रिरात्र स्यादभोजनम् ॥ लिखितः, याज्ञ. मिता., ३, २८९ ; पृ. ४६१.

अलाबुकुम्भीफलरक्तशिग्रुरक्तमूलकश्वेतवृन्ताकवन्यवृन्ताकोषरलवणं[1] हिङ्गुकर्पूरवर्जितनिर्यासान्न [2]भक्षयेत[3] ॥ २ ॥

मतिपूर्वभक्षणाभ्यासे प्राजापत्यम्[4] ॥ ३ ॥

अकामतः सकृद्भक्षणे चोपवास[5] ॥ ४ ॥

पशुपुरोडाशादेर्भक्षणेऽनार्त्विज्य एकोपवासः[6] ॥ ५ ॥

घृतं [7]वा यदि [8]वा तैलं विप्रो [9]नाद्यान्नखच्युतम् ॥ ६ ॥

[1] ०श्वेतवृन्ताकावन्यवृन्ताककोषलवर्ण—अ

[2] भक्षणात्—अ

[3] cf, नालिकाशणछत्राककुसुम्भालाबुविड्भवान् ।
कुम्भीकन्दकवृन्ताककोविदाराश्च वर्जयेत् ॥ याज्ञ मिता, १, १७५.
लोहितान् वृक्षनिर्यासान् वृश्चनप्रभवास्तथा । मनु, ५, ६
लोहितग्रहणात् हिङ्गुकर्पूरादीनामनिषेध । याज्ञ मिता., १, १७१
अलाबुशिग्रुकवकछत्राकलशुनानि च ।
पलाण्डुश्वेतवृन्ताकरक्तमूलकमेव च ॥
गृञ्जनारुणवृक्षासृग्जन्तुगर्भफलानि च ।
अकालकुसुमादीनि द्विजो जग्ध्वैन्दवं चरेत् ॥ वेदव्याससमृतिः, ३, ६४–६५.

[4] cf, खट्वावार्ताककुम्भीकवृश्चनप्रभवाणि च ।
भूतृण शिग्रुक चैव सुखण्ड कवकानि च ॥
एतेषा भक्षणं कृत्वा प्राजापत्य समाचरेत् ॥ बृहद्यम
तत्कामतोऽभ्यासविषयम् ॥ याज्ञ. मिता, ३, २८९; पृ ४५२

[5] cf, अमत्यैतानि षट् जग्ध्वा कृच्छ्रं सान्तपनं चरेत् ।
यतिचान्द्रायणं वापि शेषेषूपवसेदह ॥ मनु, ५, २०

[6] cf, अनुपाकृतमामानि देवान्नानि हवींषि च ॥ मनु, ५, ७
बहिर्वेदि पुरोडाशं जग्ध्वा नाद्यादहर्निशम् ॥ षट्त्रिंशन्मतम्, याज्ञ मिता., ३, २८९; पृ ४५२

[7] च for वा—क

[8] वा—omitted by अ.

[9] Adds न before नाद्यात्—अ

अद्याच्चेत्तुल्यं गोमासभक्षणैः[1] ॥ ७ ॥

पूर्ववत् प्रायश्चित्तम्[2] ॥ ८ ॥

एकेन पाणिना दत्तं घृतं तैलं लवणं पानीयं पायसं च नाश्नीयात्[3] ॥ ९ ॥

पीतशेषं पानीयं पीत्वा [4]ब्राह्मणस्त्रिरात्रं व्रतं कुर्यात् ॥ १० ॥

वामहस्तेन[5] तथा[6] ॥ ११ ॥

पादशेषं पीतशेषं शौचशेषं जलं [7]सुरासमं पर्यग्निकरणं विना[8] ॥१२॥

वस्त्राणामेकपुरुषोद्वाह्यभाराधिकाना[9] स्थूलानामन्येषा च बहूना

[1] Compare sūtras 6 and 7 with the following
घृतं वा यदि वा तैलं विप्रो नाद्यान्नखच्युतम् ।
यस्मादशुचि तत्प्राह तुल्य गोमांसभक्षणैः ॥ वसिष्ठः, अपरार्के, पृ २४२.

[2] 'शेषेषूपवसेदह ' मनु, ५, २०

[3] cf, लवण व्यञ्जनं चैव घृतं तैल तथैव च ।
लेह्यं पेय च विविध हस्तदत्तं न भक्षयेत् ॥
पैठीनसि., परा. मा. आ., पृ. ३७५.

[4] ब्राह्मणस्त्रिदिनव्रत—क.

[5] न—omitted by अ.

[6] Compare sūtras 10 and 11 with the following
पीतावशेष पानीयं पीत्वा तु ब्राह्मण क्वचित् ।
त्रिरात्र तु व्रतं कुर्याद्वामहस्तेन वा पुन ॥ शङ्खः, १७, ५६

[7] सुरापानसम—अ.

[8] cf, विप्रस्य पीतशेषं यत्तोयमन्यः पिबेद्यदि ।
मद्यपानसम प्रोक्तं तत्तोय मुनिपुङ्गवैः ॥ देवलः, स्मृ. मु., पृ. ८८१.
पादप्रक्षालनोच्छेषणेन नाचामेत् ॥ बोधायनः, १, ५, १०.

[9] भाराणा for भाराधिकाना—अ.

[1]चण्डलादिस्पृष्टाना वल्ककृता[2] च [3]प्रोक्षणाच्छुद्धि[4] ॥ १३ ॥

श्वेतसूक्ष्मवस्त्रेषु [5]पण्येष्वनूतनेषु विंशता बहुत्वम् ॥ १४ ॥

[6]चित्रवस्त्रेष्वेकादशसु बहुत्वम ॥ १५ ॥

पण्येषु[7] नूतनेषु ततो न्यूनत्वादपि बहुत्वम ॥ १६ ॥

[8]सौवर्णरजतयोश्चण्डालोदकीरजस्वलोच्छिष्टस्पर्शे त्रि·सप्तभस्मभिरुदकेन च शुद्धि.[9] ॥ १७ ॥

कास्यादेरावर्तनम् ॥ १८ ॥

[10]ताम्रस्याम्लोदकाच्छुद्धि. ॥ १९ ॥

पित्तलस्यापि [11]सौवर्णवत् ॥ २० ॥

[1] चण्डालादिस्पृष्टयादीनां—अ

[2] वल्क कृतां च—क

[3] शोषणाच्छुद्धिः—अ.

[4] cf., अद्भिस्तु प्रोक्षणं शौच बहूना धान्यवाससाम् । मनु॰, ५, ११८.
बहुत्वं च पुरुषभारहार्याधिकत्वमिति व्याचक्षते—कुल्लूक. ॥
प्रोक्षणं संहताना च बहूनां धान्यवाससाम् ॥ याज्ञवल्क्य, १, १८४.
अनेकपुरुषैर्धार्यमाणाना तु धान्यवास.प्रभृतीना स्पृष्टानामस्पृष्टाना च प्रोक्षणमेवेति निबन्धकृत: ॥ याज्ञ. मिता, १, १८४.

[5] पुण्येषु नूतनेषु—अ.

[6] This sūtra is omitted by क.

[7] पुण्येषु—अ.

[8] सौवर्णरजतयोश्च चण्डालशब्दरजस्वलाशब्दस्पर्शे—अ.

[9] cf', तैजसाना मणीना च सर्वस्याश्ममयस्य च ।
भस्मनाद्भिर्मृदा चैव शुद्धिरुक्ता मनीषिभि. ॥ मनुः, ५, १११.
तैजसानामुच्छिष्टानां गोशकृद्भस्मभि: परिमार्जनमन्यतमेन वा । मूत्रपुरीषासृक्शुक्र-कुणपस्पृष्टाना पूर्वोक्तानामन्यतमेन त्रिःसप्तकृत्व: परिमार्जनम् ॥ बोधायनः, १, ५, २६ and ४२.

[10] ताम्रं स्यादाम्लोदकाच्छुद्धिः—अ.

[11] सौवर्णवग—क.

त्रपुसीसायसाना[1] भस्मजलाभ्याम्[2] ॥ २१ ॥

[3]धान्यमेकपुरुषोद्धरणभाराधिकं चण्डालादिस्पृष्टं [4]प्रोक्षणाच्छुध्येत् ॥ २२ ॥

एकपुरुषभारं[5] प्रक्षालनाच्छुध्येत[6] ॥ २३ ॥

इति द्वितीयप्रश्ने चतुर्दशोऽध्यायः

---

[1] त्रपुसीसायसादौ—क.

[2] Compare sūtras 18 to 21 with the following

ताम्राय:कास्यरैत्याना त्रपुणः सीसकस्य च ।
शौच यथार्ह कर्तव्य क्षाराम्लोदकवारिभि ॥ मनु , ५, ११४.
त्रपुसीसकताम्राणा क्षाराम्लोदकवारिभि· ।
भस्माद्भिः कास्यलोहानां शुद्धिः प्लावो द्रवस्य तु ॥ याज्ञवल्क्य , १, १९०.
भस्मना शुध्यते कास्य ताम्रमम्लेन शुध्यति । पराशर., ७, २.
ताम्ररीतित्रपुसीसमयानामम्लोदकेन । भस्मना कास्यलोहयोः ॥ विष्णु., २३, २५–२६.
अम्भसा हेमरौप्याय· कास्य शुध्यति भस्मना ।
अम्लैस्ताम्र च रैत्य च पुन:पाकेन मृन्मयम् ॥ बृहस्पतिः, कुल्लूकः, (मनुः, ५, ११४.)

[3] धान्यमेकपुरुषाद्धरणभाराधिक—अ.

[4] प्रोक्षणाच्छुद्धि·—अ and क.

[5] पुरुषभारं—क.

[6] Compare sūtras 22 and 23 with the following

अद्भिस्तु प्रोक्षणं शौच बहूना धान्यवाससाम् ।
प्रक्षालनेन त्वल्पानामद्भि. शौचं विधीयते ॥ मनु·, ५, ११८
प्रोक्षण संहतानां च बहूनां धान्यवाससाम् ॥ याज्ञवल्क्य·, १, १८४.
बहूना च । धान्याजिनरज्जुतान्तववैदलसूत्रकार्पासवाससा च ॥ विष्णु·, २३, १३–१४.
एतेषा प्रक्षालनेन । अल्पाना च ॥ विष्णुः, २३, १७–१८.

पञ्चदशोऽध्यायः

धान्ये गृहस्थिते गृहदाहे [1]सति [2]दग्धे तत्र नरपशुमरणे तद्धान्यं त्याज्यम् ॥ १ ॥

कुसूलगर्भस्थं भूमिगर्भस्थमभ्युक्षणाच्छुध्यति[3] ॥ २ ॥

शाणं[4] [5]पाणितलं [पलमष्ट]मानं [6]प्रस्थमाढकं द्रोणं [द्रोणी] खारी चेति पूर्वपूर्वचतुर्गुणम्[7] ॥ ३ ॥

[1] सति—omitted by अ.

[2] दग्धस्तत्र—अ.

[3] Compare sūtras 1 and 2 with the following

गृहदाहे समुत्पन्ने विपन्ने पशुमानुषे ।
अभोज्यस्तद्गतो व्रीहिर्धातुद्रव्यस्य संग्रहः ॥
मृन्मयेनावरुद्धानामधो भुवि च तिष्ठताम् ।
यवमाषतिलादीनां न दोष मनुरब्रवीत् ॥ आदिपुराणम्, अपरार्कः,
पृ. २६० ; परा. मा. प्रा., पृ १३६.

[4] पाणि—अ.

[5] पाणितलं राजत प्रस्थं—अ ; पाणितल मानं राजतं—क.

[6] प्रस्थं—omitted by क

[7] cf., माषैश्चतुर्भि शाणः स्याद्धरणः स निगद्यते ॥
टङ्कः स एव कथितस्तद्द्वयं कोल उच्यते ।
क्षुद्रको वटकश्चैव द्रङ्क्षणः स निगद्यते ॥
कोलद्वयं तु कर्षः स्यात्स प्रोक्त. पाणिमानिका ।
अक्षः पिचुः पाणितलं किञ्चित्पाणिश्च तिन्दुकम् ॥
बिडालपदक चैव तथा षोडशिका मता ।
करमध्यो हंसपदं सुवर्ण कवलग्रहः ॥
उदुम्बर च पर्यायैः कर्षमेव निगद्यते ।
स्यात्कर्षाभ्यामर्धफल शुक्तिरष्टमिका तथा ॥
शुक्तिभ्यां च पल ज्ञेय मुष्टिराम्रं चतुर्थिका ।
प्रकुञ्चः षोडशी बिल्व पलमेवात्र कीर्त्यते ॥

द्रोणप्रमाणनिर्मिते चान्ने [1]श्वगोखरविड्वराहग्रामकुक्कुटकाकादिस्पृष्टे[2] स्पृष्टमात्रमुद्धृत्य शेषमन्नं [3]पर्यग्निकृत्वा [4]सहस्रगायत्र्याभिमन्त्रितजलैः [5]पव-

पलाभ्यां प्रसृतिर्ज्ञेया प्रसृतं च निगद्यते ।
प्रसृतिभ्यामञ्जलिः स्यात्कुडवोऽर्धशरावकः ॥
अष्टमानं च स ज्ञेयः कुडवाभ्यां च मानिका ।
शरावोऽष्टपलं तद्वज्ज्ञेयमत्र विचक्षणैः ॥
शरावाभ्यां भवेत्प्रस्थश्चतुःप्रस्थस्तथाढकः ।
भाजनं कांस्यपात्रं च चतुःषष्टिपलश्च सः ॥
चतुर्भिराढकैर्द्रोणः कलशो नल्वणोऽर्मणः ।
उन्मानं च घटो राशिर्द्रोणपर्यायसंज्ञितः ॥
द्रोणाभ्यां शूर्पकुम्भौ च चतुःषष्टिशरावकः ।
शूर्पाभ्यां च भवेद्द्रोणी वाहो गोणी च सा स्मृता ॥
द्रोणीचतुष्टयं खारी कथिता सूक्ष्मबुद्धिभिः ।
माषटङ्काक्षबिल्वानि कुडवप्रस्थमाढकम् ।
राशिर्गोणी खारिकेति यथोत्तरचतुर्गुणम् ॥

भावप्रकाशे पूर्वखण्डे द्वितीयभागे प्रथमे मानपरिभाषाप्रकरणे—श्लो. ६–१७, १९.

४ माषाः = १ शाणः, धरणः, टङ्कः.
४ शाणाः = १ पाणितलम्, कर्षः, अक्षः.
४ पाणितलानि = १ पलम्, मुष्टिः, बिल्वम्.
४ पलानि = १ अष्टमानम्, अञ्जलिः, कुडवः.
४ अष्टमानानि = १ प्रस्थः.
४ प्रस्थाः = १ आढकम्.
४ आढकानि = १ द्रोणः, राशिः.
४ द्रोणाः = १ द्रोणी, गोणी
४ द्रोण्यः = खारी, खारिका.

[1] श्वगोचर for श्वगोखर—अ
[2] काकादीनां स्पृष्टे for काकादिस्पृष्टे—क.
[3] पर्यग्नीकरणं कृत्वा—क.
[4] सहस्रगायत्र्या प्रोक्षितजलैः—क
[5] पवनः सुवर्जन इत्येनानुवाकेन—क.

मान· सुवर्जन इत्यनुवाकेन सकृदभिमन्त्रितैर्वा [1]जलैरभ्युक्ष्यैतदन्नं शुद्ध-मस्त्विति विप्रवचनं लब्ध्वा शुध्येत् ॥ ४ ॥

[2]एवमधिकान्नस्यापि[3] ॥ ५ ॥

घृतदधिक्षीराणि शूद्रभाण्डस्थितानि द्विजभाण्डप्रक्षेपणाच्छुध्यन्ति[4] ॥

गुडलवणादीना पर्यग्निकरणम्[5] ॥ ७ ॥

[1] जलैरभ्युक्षेत्तदन्नं—क

[2] एवं यतिकान्नस्यापि—अ ; एवमधिकान्नस्यापि न दूष . . .—क.

[3] Compare sūtras 4 and 5 with the following.

गोघ्रातेऽन्ने तथा केशमक्षिकाकीटदूषिते ।
सलिलं भस्म मृद्वापि प्रक्षेप्तव्यं विशुद्धये ॥
वाक्शस्तमम्बुनिर्णिक्तमज्ञातं च सदा शुचि । याज्ञवल्क्य., ३, १८९, १९१.
काकश्वानावलीढं तु गवाघ्रातं खरेण वा ।
स्वल्पमन्न त्यजेद्विप्र शुद्धिर्द्रोणाढके भवेत् ॥
अन्नस्योद्धृत्य तन्मात्र यच्च लालाहतं भवेत ।
सुवर्णोदकमभ्युक्ष्य हुताशेनैव तापयेत् ॥
हुताशनेन संस्पृष्ट सुवर्णसलिलेन च ।
विप्राणा ब्रह्मघोषेण भोज्य भवति तत्क्षणात् ॥ पराशरः, ६, ७१–७४.

द्रोणाभ्यधिकं सिद्धमन्नमुपहतं न दुष्यति । तस्योपहतमात्रमपास्य गायत्र्याभि-मन्त्रित सुवर्णाम्भः प्रक्षिपेत् । बस्तस्य प्रदर्शयेदग्नेश्च ॥ विष्णु , २३, ३५–३७.

महता श्ववायसप्रभृत्युपहताना तं देशं पुरुषान्नमुत्सृज्य पवमान. सुवर्जन इत्ये-तेनानुवाकेनाभ्युक्षणम् ॥ बोधायन., १, ६, ४६

[4] cf., मधूदके पयोविकारे पात्रात् पात्रान्तरानयने शौचम् ॥
बोधायनः, १, ६, ४७.

घृतदधिपयस्तक्राणामाधारभाण्डे स्थितानामदोषः । आधारदोषे तु नयेत्पात्रात्पात्रा-न्तर द्रव्यम् ।

घृतं तु पायस क्षीर तथैवेक्षुरसो गुडः ।
शूद्रभाण्डस्थित तक्रं तथा मधु न दुष्यति ॥ शङ्ख , परा मा प्रा.,
पृ. १११ ; अपरार्कः, पृ. २६९.

[5] cf., गुडादीनामिक्षुविकाराणा प्रभूतानां गृहनिहिताना वार्यग्निदानेन । सर्वलव-णाना च ॥ विष्णुः, २३, ३१–३२.

[1]बाला उपनयनादर्वाक् शुद्धाः[2] ॥ ८ ॥

शूर्पवस्त्रवायुस्पर्शनमनायुष्यमपुण्यं च ॥ ९ ॥

एवं वस्त्रकेशनखादिकम्[3] ॥ १० ॥

दिवा स्वस्त्रियं गत्वा [4]मत्या सवस्त्रोऽपोऽवगाह्य प्राणायामेन शुध्येत्[5] ॥ ११ ॥

अमत्या चेत् स्नानमात्रम्[6] ॥ १२ ॥

विप्रं वादेन निर्जित्य त्रिरात्रोपवासः[7] ॥ १३ ॥

[1] बालस्योपनयनादर्वाक् शुद्धिः—अ.

[2] cf., प्रागुपनयनात् कामचारवादभक्षः । न तदुपस्पर्शनादशौचम् ॥ गौतमः, २, १ and ७.

[3] Compare sūtras 9 and 10 with the following:

शूर्पवातनखाग्राम्बु स्नानवस्त्रपदोदकम् ।
मार्जनीरेणुकेशाम्बु हन्ति पुण्यं दिवाकृतम् ॥ अत्रिः, श्लो. ३१९.

[4] मद्यपस्त्र्यपोवगाह्य—अ.

[5] cf., प्राणायामी जले स्नात्वा खरयानोष्ट्रयानगः ।
नग्नः स्नात्वा च भुक्त्वा च गत्वा चैव दिवा स्त्रियम् ॥
याज्ञवल्क्यः, ३, २९०.

इदं च कामकारविषयम् ॥ याज्ञ. मिता., ३, २९०.

[6] cf., मैथुनं तु समासेव्य पुंसि योषिति वा द्विजः ।
गोयानेऽप्सु दिवा चैव सवासाः स्नानमाचरेत् ॥ मनुः, ११, १७४.

'मैथुनं तु . . . . स्नानमाचरेत्' इति मनुस्मरणादकामतः स्नानमात्रं कल्प्यम् ॥ याज्ञ. मिता., ३, २९०.

[7] cf., गुरुं हुंकृत्य त्वंकृत्य विप्रं निर्जित्य वादतः ।
बध्वा वा वाससा क्षिप्रं प्रसाद्योपवसेद्दिनम् ॥ याज्ञवल्क्यः, ३, २९१.

यत्तु यमेनोक्तम्—
वादेन ब्राह्मणं जित्वा प्रायश्चित्तविधित्सया ।
त्रिरात्रोपोषितः स्नात्वा प्रणिपत्य प्रसादयेत् ॥

इति तदभ्यासविषयम् ॥ याज्ञ., मिता., ३, २९१.

विप्रं हन्तुं दण्डोद्यमे कृच्छ्रम् ॥ १४ ॥

ताडने त्वतिकृच्छ्रम् ॥ १५ ॥

असृक्पाते[1] कृच्छ्रातिकृच्छ्रे[2] ॥ १६ ॥

प्रमादेन ब्राह्मणप्रहारे[3] तूपोष्य स्नात्वा प्रसादयेत्[4] ॥ १७ ॥

[5]असंनिहितजलदेशेऽप्स्वग्नौ विण्मूत्रमवशः करोति सचेलं स्नात्वा गा स्पृष्ट्वा शुध्यति[6] ॥ १८ ॥

मत्योपवसेत्[7] ॥ १९ ॥

[1] अकृते—अ.

[2] Compare sūtras 14 to 16 with the following.
विप्रदण्डोद्यमे कृच्छ्रस्त्वतिकृच्छ्रो निपातने ।
कृच्छ्रातिकृच्छ्रोऽसृक्पाते कृच्छ्रोऽभ्यन्तरशोणिते ॥ याज्ञवल्क्यः, ३ २९२.
अवगूर्य चरेत्कृच्छ्रमतिकृच्छ्रं निपातने ।
कृच्छ्रातिकृच्छ्रौ कुर्वीत विप्रस्योत्पाद्य शोणितम् ॥ मनुः, ११, २०८
अवगूर्य चरेत्कृच्छ्रमतिकृच्छ्रं विपातने ।
कृच्छ्रं चान्द्रायणं चैव लोहितस्य प्रदर्शने ॥ बोधायन., २, १, ७

[3] प्रमादादेकब्राह्मप्रहरे—क, प्रमादेन ब्राह्मणं प्रहरे—अ

[4] cf, ताडयित्वा तृणेनापि कण्ठे वाबध्य वाससा ।
विवादे वा विनिर्जित्य प्रणिपत्य प्रसादयेत् ॥ मनुः, ११, २०५.
गुरुं हुङ्कृत्य त्वंकृत्य विप्रं निर्जित्य वादतः ।
बध्वा वा वाससा क्षिप्रं प्रसाद्योपवसेद्दिनम् ॥ याज्ञवल्क्यः, ३, २९१

[5] अतिसंनिहित*—अ.

[6] cf., विनाद्भिरप्सु वाप्यार्तः शारीरं संनिवेश्य च ।
सचैलो बहिराप्लुत्य गामालभ्य विशुध्यति ॥ मनुः, ११, २०२
इदमकामविषयम् ॥ याज्ञ मिता, ३, २९२

[7] cf., कामतस्तु—
आपद्गतो विना तोयं शारीरं यो निषेवते ।
एकाह क्षपणं कृत्वा सचैलो जलमाविशेत् ॥ यमः, याज्ञ. मिता, ३, २९२.

मत्या सूर्योदये स्वप्ने तिष्ठन् सावित्रीं[1] जपन्नुपवसेत्[2] ॥ २० ॥

स्नानादिकर्मलोप उपवासः[3] ॥ २१ ॥

अष्टशतजपो वा [4]जीर्णमलवद्वाससो धारणे[5] ॥ २२ ॥

ऋतौ भार्याया अगमनेऽर्धकृच्छ्रम्[6] ॥ २३ ॥

दीपप्रशमनं पुंसः कूष्माण्डछेदनं स्त्रियः कुलक्षयकरं भवेद्ध्रुवम्[7] ॥ २४ ॥

इति द्वितीयप्रश्ने पञ्चदशोऽध्यायः

---

[1] सावित्रं—अ

[2] cf., तं चेदभ्युदियात्सूर्यः शयानं कामचारतः ।
निम्लोचेद्वाप्यविज्ञानाज्जपन्नुपवसेद्दिनम् ॥ मनु॰, २, २२०.
सूर्याभ्युदितो ब्रह्मचारी तिष्ठेदहरभुञ्जानोऽभ्यस्तमितश्च रात्रिं जपन् सावित्रीम् ॥ गौतम॰, २३, २१
तत्र च सूर्याभ्युदितः सन्नहस्तिष्ठेत् । सावित्रीं च जपेत ॥ वसिष्ठ, २०, ४–५.

[3] cf., वेदोदितानां नित्यानां कर्मणां समतिक्रमे ।
स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम् ॥ मनु., ११, २०३.
नित्यं शुचिः सुगन्धिः स्नानशीलः ॥ गौतम., ९, २.

[4] जीर्णमलवद्वासोधारणे—क.

[5] cf., एतेषामाचाराणामेकैकस्य व्यतिक्रमे गायत्र्यष्टशतं जप्यं कृत्वा पूतो भवति ॥ [इति स्नातकव्रतमधिकृत्य] क्रतु, याज्ञ. मिता॰, ३, २९२
सति विभवे न जीर्णमलवद्वासाः स्यात् ॥ गौतम, ९, ३.

[6] cf, ऋतौ न गच्छेद्यो भार्यां सोऽपि कृच्छ्रार्धमाचरेत् ॥
बृहस्पतिः, याज्ञ मिता., ३, २९२.

[7] cf., सायणीये—
पुंसां दीपप्रशमनात् स्त्रीणां कूष्माण्डखण्डनात् ।
अचिरेणैव कालेन वंशच्छेदो भविष्यति ॥ स्मृतिरत्नाकरः, पृ. ३८१ ;
स्मृ. मु., पृ ४६६.

षोडशोऽध्यायः

अस्नात्वा भोजने रिक्तकमण्डलुवहने[1] चोपवासः[2] ॥ १ ॥

एकपङ्क्तौ[3] विषमेणान्नप्रदाने[4] नदीप्रवाहबन्धनादौ[5] विवाहविघ्नकरणे समेषु विषमपूजाकरणे च भैक्ष्यान्नेन[6] प्राजापत्यं चरेत्[7] ॥ २ ॥

अमेध्यगन्धाघ्राणे प्राणायामम्[8] ॥ ३ ॥

कुनखी श्यावदन्तकश्च[9] कृच्छ्रं चरित्वा [10]नखान्ताश्चोद्धरेत्[11] ॥४॥

[1] रिक्तकमण्डलुदाने—अ.

[2] cf., वहन् कमण्डलु रिक्तमस्नातोऽन्नश्च भोजनम् ।
अहोरात्रेण शुद्धिः स्याद्दिनजप्येन चैव हि ॥ हारीत, याज्ञ. मिता, ३, २९२, पृ. ४६४.

[3] एकपङ्क्त्या—क.

[4] विषमेणान्नदाने—क

[5] नदीप्रवाहबन्धनात्तथा—क

[6] भिक्षान्नेन—अ.

[7] cf, न पङ्क्त्या विषमं दद्यान्न याचेत न दापयेत् ।
याचको दापको दाता न वै स्वर्गस्य भागिनः ॥
प्राजापत्येन कृच्छ्रेण मुच्यते कर्मणस्ततः ।
नदीसङ्क्रमहन्तुश्च कन्याविघ्नकरस्य च ॥
समे विषमकर्तुश्च निष्कृतिर्नोपपद्यते ।
त्रयाणामपि चैतेषां प्रत्यापत्तिं च मार्गताम् ॥
भैक्षलब्धेन चान्नेन द्विजश्चान्द्रायणं चरेत् ॥
यम, याज्ञ. मिता., ३, २९२, पृ. ४६४.

[8] cf, यदुपस्थकृतं पापं पद्भ्यां वा यत्कृतं भवेत् ।
बाहुभ्यां मनसा वाचा श्रोत्रघ्राणेन चक्षुषा ॥
सर्वं दहति निःशेषं प्राणायामैस्त्रिभिः कृतैः ॥ बोधायन, २, ४, १८.

[9] श्यावदन्तश्च—क

[10] अ MS is corrupt It reads नखान्ततांश्चान्धस्तेन पतिता अपि चेद्धस्तेन पतितापि पङ्क्तिभोजने etc.

[11] cf., कुनखी श्यावदन्तश्च कृच्छ्रं द्वादशरात्रं चरित्वोद्धरेयाताम् ॥ वसिष्ठ., २०, ७

पतितादिपङ्क्तिभोजन उपोष्य पञ्चगव्यम्[1] ॥ ५ ॥

नीलवस्त्रधारणे चैवम्[2] ॥ ६ ॥

कम्बले पट्टवस्त्रे [3]च नैल्यं[4] न दोषः[5] ॥ ७ ॥

[6]पालाशकाष्ठकृतपादुकापीठाद्युपयोगे[7] त्रिरात्रम्[8] ॥ ८ ॥

गुरुशिष्ययो. स्वाध्याये सानाय्यदोहनकाले [9]विवाहे वरकन्ययो-रन्तरागमनेऽभ्यासे चान्द्रायणम्[10] ॥ ९ ॥

अनभ्यासे तूपवासः[11] ॥ १० ॥

दु·स्वप्नारिष्टदर्शनादौ घृतं हिरण्यं च दद्यात्[12] ॥ ११ ॥

[1] cf, अपाङ्क्तेयस्य य कश्चित् पङ्क्तौ भुङ्क्ते द्विजोत्तम ।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ॥ मार्कण्डेयः, याज्ञ. मिता, ३, २९२; पृ ४६४

[2] cf, नीलीरक्तं यदा वस्त्रं ब्राह्मणोऽङ्गेषु धारयेत् ।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ॥ आपस्तम्बस्मृति., ६, ४.

[3] च—omitted by क

[4] नित्य—क

[5] cf, कम्बले पट्टवस्त्रे च नीलीरागो न दुष्यति ॥ भृगु, याज्ञ. मिता, ३, २९२; पृ. ४६४

[6] पलाश for पालाश—क

[7] पित्राद्युपयोगे—अ

[8] cf, अध्यास्य शयन यानमासने पादुके तथा ।
द्विज पलाशवृक्षस्य त्रिरात्रं तु व्रती भवेत् ॥ शङ्खः, १७, ५१-५२.

[9] विवाहवर°—अ.

[10] cf, होमकाले तथा दोहे स्वाध्याये दारसंग्रहे ।
अन्तरेण यदा गच्छेद्द्विजश्चान्द्रायण चरेत् ॥ शङ्खः;
एतच्चाभ्यासविषयम् ॥ याज्ञ. मिता., ३, २९२; पृ. ४६५

[11] cf, 'शेषेषूपवसेदहः' मनुः, ५, २०.

[12] cf., दु स्वप्नारिष्टदर्शनादौ घृतं हिरण्य च दद्यात् ॥
शङ्खः, याज्ञ. मिता., ३, २९२, पृ. ४६५.

[1]नाभिं विनान्यगात्रेषु तृणवृक्षसमुद्भवः ॥ १२ ॥

मूर्ध्नि [2]कास्यानां [3]चूर्णनम् ॥ १३ ॥

मुण्डनम् ॥ १४ ॥

नग्नता ॥ १५ ॥

मलिनाम्बरधारित्वम् ॥ १६ ॥

[4]अभ्यङ्गः ॥ १७ ॥

[5]उच्चात्प्रपतनम् ॥ १८ ॥

[6]दोलारोहणम् ॥ १९ ॥

अर्जनं[7] पद्मलोहानाम् ॥ २० ॥

हयानां च [8]मारणम् ॥ २१ ॥

[9]रक्तपुष्पद्रुमचण्डालवराहभल्लूकखरोष्ट्राणामारोहणम्[10] ॥ २२ ॥

पक्वमांसतैलकृसराणां भक्षणम् ॥ २३ ॥

नर्तनहसनविवाहगीतगानानि[11] ॥ २४ ॥

तन्त्रीवाद्यव्यतिरिक्तवाद्यवादनम् ॥ २५ ॥

[12]स्रोतोऽवगाहनम् ॥ २६ ॥

गोमयवारिस्नानम् ॥ २७ ॥

पङ्कोदकमज्जनम् ॥ २८ ॥

[13]महीतोयस्नानम् ॥ २९ ॥

[1] नगाग्रेषु वा तृण°—अ, नाभौ वा गात्रेषु वा तृण°—क.

[2] कास्यादीनां—क.

[3] चूर्णम्—अ.

[4] अभ्यञ्जनम्—क.

[5] दिव्यात्प्रपतनम्—अ.

[6] आन्दोलनारोहण—क.

[7] वर्जनं—क; मज्जनं—अ.

[8] हरणम्—अ.

[9] रक्तपुष्पधृतं चण्डाल°—अ.

[10] चारोहणम् for आरोहणम्—क.

[11] नर्तनहासनविवाहगतगानानि—अ.

[12] प्रेतोपगूहगमनम्—अ.

[13] महिषीतोयस्नानम्—क.

मातुर्जठरप्रवेश· ॥ ३० ॥

शक्रध्वजचन्द्रसूर्याणा पतनम् ॥ ३१ ॥

दिव्यान्तरिक्षभौमोत्पातः ॥ ३२ ॥

देवब्राह्मणभूपालप्रजाना प्रकोपनम् ॥ ३३ ॥

[1]कुमार्यालिङ्गनम् ॥ ३४ ॥

पुरुषमैथुनम् ॥ ३५ ॥

स्वगात्राणा[2] हानिः ॥ ३६ ॥

दक्षिणदिग्गमनम् ॥ ३७ ॥

व्याधिपीडनम् ॥ ३८ ॥

[3]फलापहरणम् ॥ ३९ ॥

शाड्वलशोषणम्[4] ॥ ४० ॥

गृहपतनम् ॥ ४१ ॥

पिशाचक्रव्यादवानरैः क्रीडनम् ॥ ४२ ॥

परादभिभवः ॥ ४३ ॥

व्यसनम् ॥ ४४ ॥

काषायवस्त्रधारणम् ॥ ४५ ॥

[1] कुमार्या लिङ्गदर्शनम्—अ.

[2] स्वगोत्राणा—अ.

[3] पलाशहरणम्—क.

[4] Compare sūtras 33 to 40 with the following:

देवद्विजादिभूपाना प्रजाना क्रोध एव च।
आलिङ्गन कुमारीणां प्राणिना चैव मैथुनम् ॥
हानिश्चैव स्वगात्राणा वीरकण्ठमनःप्रियान्? ।
दक्षिणाशाभिगमनं व्याधिनाभिभवस्तथा ॥
फलापहारश्च तथा तथा शाड्वलशोषणम् ॥

इत्यशुभस्वप्नाधिकारे स्वप्नप्रकाशिका, पृ. ७५.

काषायद्रव्यक्रीडनम ॥ ४६ ॥

[1]स्नेहावगाहनम्[2] ॥ ४७ ॥

[1] स्नानम् for स्नेहावगाहनम्—क.

[2] Compare sūtras 45 to 47 with the following

काषायवस्त्रधारित्व तद्वत्क्रीडनके तथा ।
स्नेहपानावगाहौ च रक्तमाल्यानुलेपनम् ॥ स्वप्नप्रकाशिका, पृ. ७६.

Compare sūtras 12 to 47 with the following

इदानी कथयिष्यामि निमित्त स्वप्नदर्शने ।
नाभि विनान्यगात्रेषु तृणवृक्षसमुद्भव ॥
चूर्णनं मूर्ध्नि कास्याना मुण्डन नग्नता तथा ।
मलिनाम्बरधारित्वमभ्यङ्ग पङ्कदिग्धता ॥
उच्चात्प्रपतनं चैव दोलारोहणमेव च ।
अर्जनं पङ्क(पद्म)लोहाना हयानामपि मारणम् ॥
रक्तपुष्पद्रुमाणा च मण्डलंस्य (चण्डालस्य) तथैव च ।
वराहर्क्षखरोष्ट्राणा तथा चारोहणक्रिया ॥
भक्षणं पक्षिमत्स्याना (पक्कमासाना) तैलस्य कृसरस्य च ।
नर्तन हसन चैव विवाहो गीतमेव च ॥
तन्त्रीवाद्यविहीनाना वाद्यानामभिवादनम् ।
स्रोतोऽवगाहगमनं स्नान गोमयवारिणा ॥
पङ्कोदकेन च तथा महीतोयेन चाप्यथ ।
मातु प्रवेशो जठरे चितारोहणमेव च ॥
शक्रध्वजाभिपतनं पतनं शशिसूर्ययोः ।
दिव्यान्तरिक्षभौमानामुत्पाताना च दर्शनम् ॥
देवद्विजातिभूपालगुरूणा क्रोध एव च ।
आलिङ्गन कुमारीणा पुरुषाणा च मैथुनम् ॥
हानिश्चैव स्वगात्राणा विरेकवमनक्रिया ।
दक्षिणाशाभिगमनं व्याधिनाभिभवस्तथा ॥
फलापहानिश्च तथा पुष्पहानिस्तथैव च ।
गृहाणा चैव पातश्च गृहसंमार्जनं तथा ॥
क्रीडा पिशाचक्रव्यादवानरर्क्षनरैरपि ।
परादभिभवश्चैव तस्माच्च व्यसनोद्भवः ॥

एवमादिषु दुःस्वप्नेषु सहिरण्याज्यपात्रे यन्मे मन इति मुखमवलोक्य[1] ब्राह्मणाय दद्यात्[2] ॥ ४८ ॥

अनुहवं परिह्वमिति सहस्रकृत्वो वा जपेत्[3] ॥ ४९ ॥

इति द्वितीयप्रश्ने षोडशोऽध्यायः

सप्तदशोऽध्यायः

अङ्गवङ्गकलिङ्गदेशान् गत्वा पुनःसंस्कारमर्हति[4] ॥ १ ॥

काषायवस्त्रधारित्व तद्वत्स्त्रीक्रीडनं तथा ।
स्नेहपानावगाहौ च रक्तमाल्यानुलेपनम् ॥
एवमादीनि चान्यानि दु स्वप्नानि विनिर्दिशेत् ॥

मत्स्यपुराणम्, २४२, २–१५.

[1] मुखमवेक्ष्य—क.

[2] cf, दु स्वप्नारिष्टदर्शनादौ घृत सुवर्ण च दद्यात् ॥ शङ्खः, याज्ञ· मिता., ३, २९२; पृ ४६५.

[3] Compare sūtras 48 and 49 with the following·
दु स्वप्नानेवमादीन्वै दृष्ट्वा ब्रूयान्न कस्यचित् ।
स्नान कुर्यादुषस्येव दद्याद्धेमतिलानि यः ॥
पठेत्स्तोत्राणि देवाना रात्रौ देवालये वसेत् ।
कृत्वैवं त्रिदिनं विप्रो दु स्वप्नात्परिमुच्यते ॥ स्वप्नप्रकाशिका, पृ. ७५.
एवमादीनि चान्यानि दु स्वप्नानि विनिर्दिशेत् ।
तेषामकथनं धन्य भूयः प्रस्वापन तथा ॥
कल्कस्नानं तिलैर्होमो ब्राह्मणानां च पूजनम् ।
स्तुतिश्च वासुदेवस्य तथा तस्यैव पूजनम् ॥
नागेन्द्रमोक्षश्रवण ज्ञेयं दुःस्वप्ननाशनम् । मत्स्यपुराणम्, २४२, १५-१७.

[4] cf., सिन्धुसौवीरसौराष्ट्रान् तथा प्रत्यन्तवासिन ।
अङ्गवङ्गकलिङ्गांश्च गत्वा संस्कारमर्हति ॥ देवलः, श्लो. १६.

आत्मनः [1]शकृद्वीक्षेत चेत् सूर्यं ब्राह्मणं गां वा पश्येत्[2] ॥ २ ॥

अग्निं[3] खट्वादेरधः कृत्वा दर्भैश्च पादौ संमृज्योपवसेत्[4] ॥ ३ ॥

क्षत्रियवैश्ययोरभिवादने तूपवासः ॥ ४ ॥

शूद्राभिवादने तु त्रिरात्रम्[5] ॥ ५ ॥

[1] सकृद्वीक्षेत चेत्—अ; शकृद्विक्षेपश्चेत्—क

[2] cf., प्रत्यादित्य न मेहेत न वीक्षेदात्मनः शकृत् ।
दृष्ट्वा सूर्यं निरीक्षेत गामग्निं ब्राह्मणं तथा ॥ यमः, याज्ञ मिता, ३, २९२, पृ ४६५.

[3] The text is printed here as found in क MS The MS अ omits sūtras 3 to 11 of this chapter here except the words 'अग्निं' (XVII, 3) and 'सावित्रीसहस्रमप्सु जपेत्' (XVII, 11) and cite them between the words "नद्यां स्नात्वा' and 'प्राणायामत्रयम्' of sūtra 1 of chapter XVIII Sūtras 12 to 17 of chapter XIX are cited here between the words 'अग्निं' (XVII, 3) and 'सावित्रीसहस्रमप्सु जपेत्' (XVII, 11). Only the word 'जप्यायुत' (XIX, 12) is omitted here. Sūtras 13 to 17 are repeated in chapter XIX Thus the MS अ reads as follows

आत्मनः शकृद्वीक्षेत चेत् सूर्यं ब्राह्मणं गां वा । पश्येदग्निं तथा देवीं सर्वकल्मषनाशिनीम् । लक्षं जप्त्वा तु तां देवीं महापातकनाशनीम् ॥ सुवर्णस्तेयकृद्विप्रो ब्रह्महा गुरुतल्पगः । सुरापश्च विशुध्यन्ति लक्षं जप्त्वा न संशयः ॥ एकादशानां रुद्रानुवाकानां समूहो रुद्रैकादशिनी । सा च विशेषतः सर्वपापहरा । एकादश गुणान्वापि रुद्रानावृत्य धर्मवित् । महद्भ्यश्च तु पापेभ्यो मुच्यते नात्र संशयः ॥ इति । महापातकेष्वेकादशावृत्तिकथनादतिपातकादिषु चतुर्थांशो ह्रासः । सावित्रीसहस्रमप्सु जपेत् । चण्डालरजकादिस्पर्शे etc.

[4] cf, पादप्रतपनं कृत्वा कृत्वा वह्निमधस्तथा ।
कुशैः प्रमृज्य पादौ तु दिनमेकं व्रती भवेत् ॥ शङ्ख, १७, ४९–५०.
नामेध्यं प्रक्षिपेदग्नौ न च पादौ प्रतापयेत् ॥
अधस्तान्नोपदध्याच्च न चैनमभिलङ्घयेत् । मनु, ४, ५३–५४.
स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम् ॥ मनु, ११, २०३.

[5] Compare sūtras 4 and 5 with the following

क्षत्रियाभिवादनेऽहोरात्रमुपवसेत् । वैश्याभिवादने द्विरात्रम् । शूद्रस्याभिवादने त्रिरात्रमुपवासः ॥ हारीतः, याज्ञ. मिता., ३, २९२; पृ. ४६५

शय्यारूढपादुकोपानहारोपितपादोच्छिष्टान्धकारस्थ[1]श्राद्धकृज्जपहोमदेवता[2]पूजानिरताज्यसमित्पुष्पकुशाग्न्यम्बुमृदन्नपाणिक [3]विप्रसमूहस्थ चाभिवाद्य त्रिरात्रम्[4] ॥ ६ ॥

एतत्प्रायश्चित्तमभिवाद्याभिवादकयोरपि[5] समानम् ॥ ७ ॥

अशुचिर्नाभिवादयेत ॥ ८ ॥

पितृकार्याणि कुर्वन् ॥ ९ ॥

शयानश्च[6] ॥ १० ॥

1 श्राद्ध—omitted by अ, श्राद्धकृतो जप°—क

2 °पूजाग्न्समित्पुष्प°—अ ; °पूजाज्यसमित्पुष्प°—क.

3 विप्रं समूहस्थं—क

4 cf, शय्यारूढे पादुकोपानहारोपितपादोच्छिष्टान्धकारस्थश्राद्धकृज्जपदेवपूजानिरताभिवादने त्रिरात्रमुपवास स्यादन्यत्र निमन्त्रितेनान्यत्र भोजनेऽपि त्रिरात्रम् ॥ हारीत, याज्ञ मिता, ३, २९२, पृ ४६५.

समित्पुष्पकुशाज्याम्बुमृदन्नाक्षतपाणिकम् ।
जपं होम च कुर्वाण नाभिवादेत वै द्विजम ॥ आपस्तम्ब, याज्ञ. मिता, ३, २९२; पृ ४६५.

जपयज्ञजलस्थश्च समित्पुष्पकुशानलान् ।
उदकुम्भं च भैक्ष च वहन्त नाभिवादयेत् ॥ हारीत, कृत्यकल्पतरौ ब्रह्मचारिकाण्डम्, पृ. १९५.

5 अभिवादयोरपि for अभिवादकयोरपि—क

6 Compare sūtras 7 to 10 with the following

सोपानत्कश्चाशनासनाभिवादननमस्कारान् वर्जयेत् ॥ गौतम., ९, ४७
चशब्दात् पादुकास्थश्च ॥ मस्करी

अभिवादकस्यापीदमेव प्रायश्चित्तम्—"नोदकुम्भहस्तोऽभिवादयेत् । न भैक्षं चरन् । न पुष्पाज्यादिहस्त । नाशुचि । न जपन् । न देवपितृकार्य कुर्वन् । न शयानः ॥" इति तस्यापि शङ्खेन प्रतिषेधात् ॥ याज्ञ. मिता, ३, २९२; पृ. ४६५.

संक्रान्त्यादिनिषिद्धकालेऽभ्यङ्गभोजनमैथुनादौ सावित्रीमहस्रमप्सु जपेत[1] ॥ ११ ॥

चण्डालरजकादिस्पृष्टस्पर्शे[2] तूपवासः[3] ॥ १२ ॥

अभ्यासे त्रिरात्रम्[4] ॥ १३ ॥

यूपं [5]चण्डालं देवलकं वित्तार्थं देवपूजकं ब्राह्मणं च स्पृष्ट्वा [6]सचेलस्नानम्[7] ॥ १४ ॥

[8]एतद्विष्ण्वर्चकविषयम् ॥ १५ ॥

सूर्यचन्द्राद्यर्चकानां[9] सद्यःपतनम् ॥ १६ ॥

[1] cf , संक्रान्त्यादिनिमित्तेष्वस्नात्वा भोजनेऽष्टसहस्रं गायत्रीजप ॥ प्रायश्चित्तेन्दुशेखर , पृ २३

[2] चण्डालरजकादिस्पर्शे—अ.

[3] cf , चण्डालरजकादिस्पृष्टस्पर्शनिमित्ते त्वस्नात्वा भोजने तूपवास. ॥ प्रायश्चित्तेन्दुशेखरः, पृ. २३.

[4] cf , यत्तु देवलेनोक्तम्—

अशुद्धान् स्वयमप्येतानशुद्धश्च यदि स्पृशेत् ।
विशुध्यत्युपवासेन त्रिरात्रेण तत शुचिः ॥

इति, तत् सहोपवेशनशयनादिना चिरस्पर्शविषयम् ॥ परा मा. प्रा , पृ. ५३

[5] चण्डालदेवलकं—अ

[6] सचेल स्नानम्—क.

[7] cf., चैत्यवृक्षश्चितिर्यूपश्चण्डालः सोमविक्रयी ।
एतांस्तु ब्राह्मण· स्पृष्ट्वा सवासा जलमाविशेत् ॥ पराशर , १२, २७.
चितिं च चितिकाष्ठं च यूपं चण्डालमेव च ।
स्पृष्ट्वा देवलकं चैव सवासा जलमाविशेत् ॥ चतुर्विंशतिमतम्, परा. मा. प्रा., पृ. ८३

देवार्चनपरो विप्रो वित्तार्थी वत्सरत्रयम् ।
असौ देवलको नाम हव्यकव्येषु गर्हितः ॥ स्मृत्यन्तरे, वीरमित्रोदये शुद्धिप्रकाश , पृ १४६ , 'आश्वमेधिके' इति स्मृतिरत्नाकर., पृ. ३१

[8] एतद्विष्ण्वर्चनविषयम्—अ.

[9] सूर्यचन्द्राद्यर्चने—अ.

तीर्थयात्रां विना शतयोजनादधिकदूरदेशगो महापथिकः[1] ॥ १७ ॥

प्रहसनेऽनृतभाषणे[2]ऽधोवायुसमुत्सर्गे[3] मार्जारस्पर्शे कर्म कुर्वन्नप उपस्पृशेत्[4] ॥ १८ ॥

इति द्वितीयप्रश्ने सप्तदशोऽध्यायः

अष्टादशोऽध्यायः

भुञ्जानस्य मस्तकेऽमेध्यपतने तदन्नं त्यक्त्वा नद्यां स्नात्वा[5] प्राणायामत्रयम्[6] ॥ १ ॥

[1] तीर्थयात्रामन्तरेण देशान्तरगमने देवल. प्रायश्चित्तमाह ॥ परा. मा. प्रा., पृ. ४४७.

[2] प्रहसेऽकृतभाषणे—क.

[3] अधोवायुविसर्जने—क

[4] cf., सुप्त्वा क्षुत्त्वा च भुक्त्वा च निष्ठीव्योक्त्वानृतानि च ।
पीत्वापोऽध्येष्यमाणश्च आचामेत्प्रयतोऽपि सन् ॥ मनु., ५, १४५
अधोवायुसमुत्सर्गे त्वाक्रन्दे क्रोधसंभवे ।
मार्जारमूषिकास्पर्शे प्रहासेऽनृतभाषणे ॥
निमित्तेष्वेषु सर्वेषु कर्म कुर्वन्नप स्पृशेत् ॥ बृहस्पति., स्मृतिरत्नाकर, पृ ६५

[5] MS अ reads thus
नद्यां स्नात्वा खट्वारीरथं कृत्वा दर्भैश्च पादं सम्मृज्योपवसेत । क्षत्रियवैश्ययोरभिवादने तूपवासः । शूद्राभिवादने तु त्रिरात्रम् । शय्यारूढपादुकोपानहारोपितपादोच्छिष्टान्धकारस्थकृतो जपहोमदेवतापूजास्समित्पुष्पकुशाग्न्यम्बुमृदन्नपाणिकं विप्रसमूहस्थं चाभिवाद्य त्रिरात्रम् । एतत्प्रायश्चित्तमभिवाद्याभिवादकयोरपि समानम् । अशुचिर्नाभिवादयेत् । पितृकार्याणि कुर्वन्‌। शयानश्च । संक्रान्त्यादिनिषिद्धकालेऽभ्यङ्गभोजनमैथुनानि प्राणायामत्रयम् । भुञ्जानस्यामगोत्रस्पर्शने etc See foot-note on XVII, 3, p 79

[6] cf, भुञ्जानस्य तु विप्रस्य विष्ठा चेन्मस्तके पतेत् ।
अन्नं त्यक्त्वा नदीस्नातः प्राणायाम त्रिरभ्यसेत् ॥ वृद्धयाज्ञवल्क्य,
अपरार्कः, पृ ११७१.

भुञ्जानस्यासगोत्रस्पर्शने तदन्नं त्यक्त्वोदकं स्पृशेत् ॥ २ ॥

गोत्रस्पर्शे तु भोजनाद्विरम्य शुद्धिः[1] ॥ ३ ॥

[2]भुञ्जानस्योच्छिष्टस्पर्शने स्नानं जपं च कृत्वा दिनान्ते घृतप्राशनम्[3] ॥ ४ ॥

चण्डालादिस्पर्शे [4]त्वस्नात्वा भोजने चान्द्रायणम्[5] ॥ ५ ॥

असंभाष्यैः संभाषणे पुण्यकृतो मनसा ध्यायेत् ॥ ६ ॥

ब्राह्मणेन वा संभाषेत[6] ॥ ७ ॥

विना यज्ञोपवीतेनामत्याऽभक्षणे प्राणायामत्रयम् ॥ ८ ॥

भोजने नक्तम्[7] ॥ ९ ॥

भुक्त्वानाचम्योत्थाने [8]सद्यःस्नानम्[9] ॥ १० ॥

[1] Compare sūtras 2 and 3 with the following
भुञ्जानस्यानुच्छिष्टेन सगोत्रेणासगोत्रेण वा स्पर्शे भोजनाद्विरम्य शुद्धिः ॥ प्रायश्चित्तेन्दुशेखरः, पृ. २५.

[2] भुञ्जानस्योच्छिष्टस्पर्शने जपं च—अ.

[3] cf., भुञ्जानस्योच्छिष्टेन सवर्णेन स्पर्शे स्नानं जपो वा ॥ प्रायश्चित्तेन्दुशेखरः, पृ. २५.

[4] त्वस्नानभोजने—अ, अस्नात्वा भोजने—क.

[5] cf., चण्डालादिस्पर्शनिमित्तेष्वस्नात्वा भुक्तौ त्रिरात्रं कायं वा। मत्या चान्द्रं सकृत् ॥ प्रायश्चित्तेन्दुशेखर., पृ. २३.

[6] Compare sūtras 6 and 7 with the following
न म्लेच्छाशुच्यधार्मिकैः सह संभाषेत। संभाष्य पुण्यकृतो मनसा ध्यायेत्। ब्राह्मणेन वा सह संभाषेत ॥ गौतमः, ९, १७–१९.

[7] Compare sūtras 8 and 9 with the following
पिबतो मेहतश्चैव भुञ्जतोऽनुपवीतिनः।
प्राणायामत्रिकं षट्कं नक्तं च त्रितयं क्रमात् ॥ स्मृत्यन्तरे, याज्ञ. मिता., ३, २९२.

[8] वा सद्यः स्नानम्—अ.

[9] cf., यद्युत्तिष्ठत्यनाचान्तो भुक्त्वा वानशनात्ततः।
सद्यःस्नानं प्रकुर्वीत सोऽन्यथा पतितो भवेत् ॥ स्मृत्यन्तरे, याज्ञ. मिता., ३, २९२.

इन्द्रचापं [1]पलशाग्निं परस्मै दर्शयित्वोपोष्य धनुर्दण्डं दक्षिणां च दद्यात्[2] ॥ ११ ॥

अप्सु स्वप्रतिबिम्बं दृष्ट्वा मयि तेज इति [3]जपेत्[4] ॥ १२ ॥

क्षुत्वा भुक्त्वा [5]सुप्त्वानृतेऽपि [6]चाचामेत[7] ॥ १३ ॥

इति[8] [9]प्रकीर्णकप्रायश्चित्तम् ॥ १४ ॥

इति द्वितीयप्रश्ने ऽष्टादशोऽध्यायः

एकोनविंशोऽध्यायः

[10]अनृतं मद्यगन्धं [11]दिवा स्वापं दिवा मैथुनं [12]नग्नस्त्रीदर्शनं

[1] पालाशाग्निं—अ.

[2] cf, इन्द्रचापं पलाशाग्निं यदन्यस्य प्रदर्शयेत् ।
प्रायश्चित्तमहोरात्रं धनुर्दण्डश्च दक्षिणा ॥ ऋष्यशृङ्ग, याज्ञ मिता., ३, २९२.

[3] जप्त्वा—अ

[4] cf, मयि तेज इति च्छायां स्वां दृष्ट्वाम्बुगतां जपेत् ॥ याज्ञवल्क्य., ३, २७९.

[5] सुप्त्वा चानृतेऽपि—क.

[6] वाचामेत्—अ.

[7] cf, सुप्त्वा भुक्त्वा च क्षुत्वा च निष्ठीव्योक्त्वानृतानि च ।
पीत्वापोऽध्येष्यमाणश्च आचामेत्प्रयतोऽपि सन् ॥ मनुः, ५, १४५

[8] इति—omitted by क.

[9] विप्रकीर्णकप्रायश्चित्तम्—अ.

[10] अनृतममेध्यगन्धं—अ.

[11] दिवा स्वापनं—अ.

[12] नग्नस्त्रीदर्शनं पश्वादिसंग दृष्ट्वा—omitted by क.

पश्चादिसंगं दृष्ट्वा वृषलान्नं च [1]पुनाति [2]बहिःसंध्या ह्युपासिता[3] ॥ १ ॥

अग्नेर्मन्वेति सूक्तं जलमध्ये स्थितः सन् जपेत् ॥ २ ॥

[4]वितन्तुगमनदोषान्मुच्यते[5] ॥ ३ ॥

अथ[6] सर्वपापक्षयकरा मन्त्रा. ॥ ४ ॥

विश्वानि देव सवितरिति ॥ ५ ॥

आकृष्णेनेति ॥ ६ ॥

ऋचं वाचं प्रपद्ये मनो यजुः प्रपद्य [7]ऋतं प्रपद्य इति ॥ ७ ॥

तथा[8] गायत्रीसहस्रं महापातकेषु[9] ॥ ८ ॥

[1] भुनाति—क

[2] बहि सध्यामुपासीत—अ

[3] cf , अनृत मद्यगन्ध च दिवा मैथुनमेव च ।
पुनाति वृषलस्यान्न बहि संध्या ह्युपासिता ॥
शातातप , याज्ञ. मिता , ३, ३०७.
निशाया वा दिवा वापि यदज्ञानकृतं भवेत् ।
त्रैकाल्यसध्याकरणात्तत्सर्व विप्रणश्यति ॥ याज्ञवल्क्य , ३, ३०७.

[4] वितन्तुगमने दोषान्मुच्यते—अ

[5] Compare with sūtras 2 and 3
अग्नेर्मन्वेऽनुवाक तु जपेदेनमनुत्तमम् ।
सिहेमे मन्युरित्येतमनुवाक जपेद्द्विजः ॥
जप्त्वा पापे प्रमुच्येत बौधायनवचो यथा । चतुर्विंशतिमतम्,
स्मृ. मु., पृ. ३४८.

[6] अथ—omitted by क.

[7] ऋतं प्रपद्ये—omitted by क.

[8] तदा—क.

[9] cf., सहस्रकृत्वस्त्वभ्यस्य बहिरेतत्त्रिक द्विज. ।
महतोऽप्येनसो मोहात्त्वचेवाहिर्विमुच्यते ॥ मनु., २, ७९.
सावित्री वा सहस्रकृत्व आवर्तयेत्पुनीते हैवात्मानम् ॥ गौतमः, २४, १३.

प्रकीर्णकादिषु [1]शतम्[2] ॥ ९ ॥

अथाप्युदाहरन्ति ॥ १० ॥

शतजप्या महादेवी सर्वपापप्रणाशनी ।

सहस्रजप्या च तथा उपपातकनाशनी ॥ ११ ॥

जप्यायुतं तथा दवी सर्वकल्मषनाशनी ।

लक्ष जप्या तु सा देवी महापातकनाशनी ॥ १२ ॥

सुवर्णस्तेयकृद्विप्रो ब्रह्महा गुरुतल्पगः ।

सुरापश्च विशुध्यन्ति लक्षं [3]जप्त्वा न संशय इति[4] ॥ १३ ॥

[5]एकादशाना रुद्रानुवाकाना समूहो रुद्रैकादशिनी ॥ १४ ॥

[1] From शतम् to the end of sūtra 12 is omitted by अ. See footnote XVII, 3, p. 79

[2] Compare sūtras 4 to 9 with the following

शुक्रियारण्यकजपो गायत्र्याश्च विशेषत· ।

सर्वपापहरा ह्येते रुद्रैकादशिनी तथा ॥ याज्ञवल्क्य., ३, ३०८.

शुक्रियं नाम आरण्यकविशेष. 'विश्वानि देव सवित:' इत्यादि वाजसनेयके पठ्यते। आरण्यक च यजु 'ऋचं वाच प्रपद्ये मनो यजु प्रपद्ये' इत्यादि तत्रैव पठ्यते तयोर्जप सकलमहापातकादिहर:। तथा गायत्र्याश्च महापातकेषु लक्षमतिपातकोपपातकयोर्दशसहस्रमुपपातकेषु सहस्र प्रकीर्णकेषु शतमित्येवं जप सर्वपापहरः ॥ याज्ञ. मिता., ३, ३०८.

[3] जप्तुर्न—अ.

[4] Compare sūtras 10 to 13 with the following

शतं जप्त्वा तु सा देवी दिनपापप्रणाशिनी।

सहस्र जप्त्वा तु तथा पातकेभ्य: समुद्धरेत् ॥

दशसाहस्रं जप्त्वा तु सर्वकल्मषनाशिनी ।

[लक्षं जप्त्वा तु सा देवी महापातकनाशिनी ॥]

सुवर्णस्तेयकृद्विप्रो ब्रह्महा गुरुतल्पग ।

सुरापश्च विशुध्यन्ति लक्षजप्यान्न संशय· ॥ शङ्खः, १२, १५–१७.

Also see याज्ञ. मिता., ३, ३०८.

[5] एकादशरुद्रानुवाकानां—क.

सा च विशेषतः सर्वपापहरा ॥ १५ ॥

एकादशगुणान्वापि रुद्रानावृत्य धर्मवित ।

महद्भ्यः [1]स तु पापेभ्यो मुच्यते नात्र संशयः[2] ॥ १६ ॥

[3]महापातकेष्वेकादशावृत्तिकथनादतिपातकादिषु [4]चतुर्थांशो ह्रास कल्प्यः[5] ॥ १७ ॥

इति द्वितीयप्रश्न एकोनविंशोऽध्याय.

विंशोऽध्यायः

पाकयज्ञा विधियज्ञा सर्वे ते जपयज्ञस्य षोडशीं कला नार्हन्ति[6] ॥

[1] च for स—अ

[2] cf., एकादशगुणान्वापि रुद्रानावृत्य धर्मवित् ।
महापापैरुपस्पृष्टो मुच्यते नात्र संशयः ॥
सुरापो यदि वा चोरो भ्रूणहा गुरुतल्पग ।
मुच्यते सर्वपापैस्तु रुद्रांस्तु सतत जपन् ॥ अङ्गिराः, अपरार्क., पृ १२१९

[3] महापातकेष्वेकादशकथना°—क

[4] चतुर्थांशह्रासक.—क

[5] Compare sūtras 14 to 17 with the following
तथा रुद्रैकादशिनी—एकादशाना रुद्रानुवाकाना समाहारो रुद्रैकादशिनी । सा च विशेषतो जप्ता सर्वपापहरा ।
एकादशगुणान्वापि रुद्रानावृत्य धर्मवित् ।
महद्भ्य स तु पापेभ्यो मुच्यते नात्र संशयः ॥
इति महापातकेष्वेकादशगुणावृत्तिदर्शनादतिपातकादिषु चतुर्थचतुर्थांशह्रासो योजनीयः ॥ याज्ञ मिता , ३, ३०८

[6] cf , ये पाकयज्ञाश्चत्वारो विधियज्ञसमन्विता. ।
सर्वे ते जपयज्ञस्य कला नार्हन्ति षोडशीम ॥ मनु., २, ८६ , विष्णु , ५५, २० , वसिष्ठः, २६, ११.

सर्वेषा यज्ञानामुत्तमो जपयज्ञ [1] ॥ २ ॥

[2]यक्षराक्षसपिशाचा अतिभीषणा ग्रहाश्च जपिन नोपसर्पन्ति ॥ ३ ॥

दूरादेव च प्रयान्ति[3] ॥ ४ ॥

[4]ससागरकाञ्चनसंपूर्णपृथिवीदानादधिक पुण्यं सकृद्रुद्रजपात ॥ ५ ॥

[5]सहस्राब्दतपश्चर्यादधिकं पुण्यं सकृद्रुद्रजपाद्भवति ॥ ६ ॥

[6]कोटिगोदानादधिकं पुण्यं सकृद्रुद्रजपात ॥ ७ ॥

सर्वयज्ञतपोदानतीर्थानि रुद्रजपस्य षोडशी कला नार्हन्ति[7] ॥८॥

[1] cf, विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणै ॥ मनु, २, ८५; विष्णु, ५५, १९.
आरम्भयज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणै ॥ वसिष्ठ, २६, १०

[2] यक्षरक्षःपिशाचा अतिभीषणग्रहाश्च—क

[3] Compare sūtras 3 and 4 with the following
यक्षरक्षःपिशाचाश्च ग्रहा सर्वे विभीषणा ।
जापिनं नोपसर्पन्ति दूरादेवापयान्ति ते ॥ हारीत, स्मृ मु., पृ. ३५२.

[4] ससागरसंपूर्णकाञ्चनपृथिवीदानादधिकं—क, ससागरकाञ्चनसपूर्णवृद्धिविधानादधिकं—अ

[5] सहस्रादि for सहस्राब्द—क

[6] कोटिदानादधिक—अ

[7] Compare sūtras 5 to 8 with the following·
पृथ्वीं ससागरा यो हि कृत्स्नां शैलसमन्विताम् ।
दद्यात्काञ्चनसपूर्णां हैमीमौषधिसंयुताम् ॥
तस्याधिकफलं नूनं रुद्रजापी सकृद्द्विज ॥
तपस्तप्यति वात्यर्थं सहस्राब्दानि संयमी ।
न स तत्फलमाप्नोति यत्सकृद्रुद्रजापक ॥
गवां कोटिप्रदान य. करोति विधिवद्गुरौ ।
न स तत्फलमाप्नोति यत्सकृद्रुद्रजापक ॥
यज्ञास्तपांसि दानानि तीर्थानि विविधानि च ।
एतानि रुद्रजापस्य कलां नार्हन्ति षोडशीम् ॥ व्यास., स्मृ. मु., पृ. ३४९.

कृष्णाजिने [1]सर्पिर्मधुहिरण्यतिलान्निक्षिप्य यस्तु विप्राय ददाति स सर्वं दुष्कृतं तरति[2] ॥ ९ ॥

आदौ वेदस्वीकरणं विचारोऽभ्यसनं जपो दानं विप्रेभ्य इति वेदाभ्यास: पञ्चधा[3] ॥ १० ॥

ब्रह्माहमस्मीति लक्षणं य: कुर्यादात्मचिन्तनं सर्वपातकं [4]हरति यथा तम· सूर्योदये सूर्योदये[5] ॥ ११ ॥

इति द्वितीयप्रश्ने विंशोऽध्याय:

अनुक्रमणिका

पाकयज्ञा विधियज्ञा· । [6]अनृतं मद्यगन्धम् । भुञ्जानस्य मस्तकेऽमेध्यपतने । अङ्गवङ्गकलिङ्गदेशान् गत्वा । अस्नात्वा भोजने । धान्ये गृहस्थिने

[1] सर्पिर्मधु हिरण्य तिलान्निक्षिप्य—अ

[2] cf , कृष्णाजिने तिलान् कृत्वा हिरण्य मधुसर्पिषी ।
ददाति यस्तु विप्राय सर्वं तरति दुष्कृतम् ॥ वसिष्ठ., २८, २२

[3] cf. वेदस्वीकरण पूर्वं विचारोऽभ्यसन तत ।
तद्दान चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चधा ॥ याज्ञ मिता , ३, ३१०

[4] हन्ति for हरति—अ.

[5] cf , वेदाभ्यासरत क्षान्तं पञ्चयज्ञक्रियापरम् ।
न स्पृशन्तीह पापानि महापातकजान्यपि ॥ याज्ञवल्क्य , ३, ३१०
यद्यकार्यशत साग्र्यं कृतं वेदश्च धार्यते ।
सर्वं तत्तस्य वेदाग्निर्दहत्यग्निरिवेन्धनम् ॥ वसिष्ठ·, २७, १.
सर्वेषामपि चैतेषामात्मज्ञानं पर स्मृतम् ।
तद्ध्यग्र्य सर्वविद्याना प्राप्यते ह्यमृतं ततः ॥ मनु·, १२, ८५.

[6] अनृतममेध्यगन्धम्—अ.

गृहदाहे[1] । अव्रतस्यान्नम् । [2]निगलेन बद्धस्य [3]कदर्यस्य । म्लेच्छादीनां पुष्करिण्या [4]ह्रदे । अनिर्दशाहगोमहिषीक्षीरपाने[5] । श्वजम्बूकरासभैर्दष्टा[6] । कामतः [7]स्वैरिशूद्रागमने । कामतो गुरुतल्पगामी । सुरापः सुराम्बुघृतगोमूत्रपयसाम्[8] । [9]मातृगमनदुहितृगमनस्नुषागमनानि । अथ [10]ब्रह्महत्यासमम् । ब्रह्महा कुष्ठी स्यात् । ब्रह्महा [11]क्षयरोगी । [12]अथवा वेदमभ्यसन् । अथातो धर्मशेषान् व्याख्यास्यामः[13] ॥

इति गौतमधर्मसूत्रपरिशिष्टे द्वितीयः प्रश्न समाप्तः

---

[1] गृहदाहे सति—क

[2] निगले निबद्धस्य—क.

[3] कदर्यस्य—omitted by क

[4] ह्रादे—क

[5] क्षीरपाने—omitted by अ

[6] दष्टा—omitted by अ.

[7] स्वैरिशूद्र्या गमने—क, स्वैरिशूद्र्यानुगमने—अ

[8] गोमूत्रपयसाम्—omitted by क

[9] मातृगमनदुहितृगमने । अथ—अ.

[10] ब्रह्महत्यासमं पातकं वक्ष्यामः—क

[11] क्षयरोगी स्यात्—क.

[12] अथ पङ्क्तौ वेदमभ्यसन्—अ.

[13] व्याख्यास्यामः । हरिः ओम् । तत्सत् । गौतमसूत्रस्य द्वितीयः प्रश्न समाप्त । श्रीदक्षिणामूर्तिगुरुपरब्रह्मार्पणमस्तु । ओं तत्सत् । जाबालसुब्बावधानुलुगारि पुस्तुकम्—अ; व्याख्यास्याम. । हरिः ओम् । श्रीकृष्णार्पणमस्तु—क.

गौतमधर्मसूत्रपरिशिष्टस्थपदसूची

अ

अकामत., २, ७; ४, ५, ६, १६, ७, ३, ८, ३, ८, २०, ११, १९, १४, ४

अकामात्, १२, ४

अकामेन, ७, १२

अकार्पण्य, १, ११

अगमने, १५, २३

अगृहीताश्रमित्वम्, ५, ३९

अग्नि, ३, २७, १७, ३

अग्नि, १७, ६

अग्निद, १०, ११

अग्निदौ, ४, ४

अग्निपतनं, ६, १७

अग्निप्रवेश, ८, ७

अग्निस्पर्शात, ७, १

अग्निहोत्रिण., १, १०

अग्नेर्मन्वे, १९, २

अग्नौ, ९, ५; ९, ७; ९, ९, १०, ३, १२, १३, १५, १८

अग्न्युत्सादी, ४, ४९

अग्न्येयमद्ययो:, ६, ३

अङ्ग, १७, १

अङ्गहीनः, ४, ५९

अज, २, ९, ६, ४

अजगर, ४, ५३

अजावर्ज, ११, २

अजीर्णान्न., ३, ७

अज्ञानात्, ७, ५, ७, ६, ११, ३०

अञ्जलौ, ८, १

अत, १, १; ६, ७

अतिकृच्छ्रम्, ९, १३, १५, १५

अतिकृच्छ्रे, १५, १६

अतिथिप्रिय, २, २

अतिदरिद्र, ४, ३९

अतिपातकादिषु, १९, १७

अतिपातकानि, ६, १

अतिभीषणा, २०, ३

अत्यन्ताभ्यासे, ८, ७; ८, १३

अत्र, १९, १६

अथ, १, १; ५, १, ५, २; ५, ३; ५, ४; ५ ५; ६, ८; १९, ४; १९, १०

अथवा, २, १

अदत्तादाननिरत., १, ५

अदत्तादाने, १०, १८

अदत्तादायी, ४, ४७
अदाता, १३, ८
अद्भिः, १०, ३
अद्यात्, १४, ६, १४, ७
अध.कृत्वा, १७, ३
अधस्तात्, १२, २
अधिकं, २०, ५, २०, ६, २०, ७
अधिक, ५, १५
अधिकदूरदेशगः, १७, १७
अधिकान्नस्य, १५, ५
अधिकारिता, ५, ४२
अधिकारे, ५, १०
अधिक्षेप, ५, १
अधिगच्छति, १, ७
अधिगच्छेत्, ९, ५, ९, ७; ९, ९
अधीतस्य, ५, १
अधोदेशे, ९, १८
अधोवायुसमुत्सर्गे, १७, १८
अध्ययनग्रहणम्, ५, १३
अध्ययने, ४, ६४.
अध्यापक, ५, १३
अध्यापनं, ५, १४
अनध्याये, ४, ६४
अननुज्ञाताध्यायी, ३, ८
अनन्तरं, ३, ५
अनपत्य, ४, ३७
अनपाकरणम्, ५, ८
अनपाकरणे, ८, ११
अनभ्यासे, १२, ८, १६, १०
अनसूया, १, ११
अनस्थिमता, ९, १५
अनाचम्य, १८, १०
अनापदि, १३, ६
अनायास, १, ११
अनायुष्य, १५, ९
अनार्त्विज्य, १४, ५
अनावृत्ति, ८, १
अनाहिताग्निताया, ८, ११
अनाहिताग्नित्वम्, ५, १०
अनिबद्धप्रलापी, १, ४
अनिमन्त्रितभोजी, ४, २९
अनिर्दशाह, ११, १
अनिवेद्य, १२, १५
अनिष्टानि, १, ३
अनुक्त, ६, ७
अनुक्तनिष्कृतीना, ९, १५
अनुपनीतता, ५, ६
अनुपातकानि, ६, २
अनुभूय, २, ३, ३, ५
अनुवाकेन, १५, ४
अनुव्राजयेत्, ९, ६
अनुहवं परिहवमिति, १६, ४९
अनृतनेषु, १४, १४
अनृतं, १९, १
अनृतभाषणं, ५, २
अनृतभाषणे, १७, १८
अनृतवादी, १, ४, ४, २३
अनृते, १८, १३
अनृतौ, ८, १९
अनेन, ७, ९

अन्तरागमने, १६, ९
अन्तरिक्ष, १६, ३२
अन्तर्जले, ९, १८
अन्त्य, १, २
अन्त्यजसबन्धात्, ११, ३१
अन्त्यजै. १२, ७
अन्त्यासु, १, ३
अन्ध·, ४, ६, ४, ३१
अन्धकारस्थ, १७, ६
अन्न, ११, ३, ११, ४; ११, २०, ११, २२, १२, १३; १२, २४, १३, ९, १३, ११; १३, १२, १४, १, १५, ४
अन्नपाणिकं, १७, ६
अन्नप्रदाने, १६, २
अन्नहर्ता, ३, ७
अन्ने, १५, ४
अन्यगात्रेषु, १६, १२
अन्यत्, ६, ७; ६, ९
अन्यतम, ७, १
अन्यत्र, ४, ७
अन्यस्य, ६, ९
अन्येषा, १४, १३
अन्योन्यस्पर्शे, १०, १०
अप:, ११, ३, १५, ११; १७, १८
अपत्य, १०, १३
·अपत्याना, ५, २०
अपविद्ध, १३, १; १३, ७
अपस्मारी, ४, ५; ४, ३६
अपहरणं, ५, ३; ५, २१
अपहृत्य, ३, १४
अपात्रीकरणम्, ६, ५
अपि, ४, ६६, ५, १; ७, ११; ११, २२; १२, २२; १३, ७; १४, १६; १४, २०; १५, ५; १७, ७; १८, १३, १९, १०, १९, १६
अपुण्य, १५, ९
अपुत्रस्य, १४, १
अपूजक, १३, ७
अपूप, १२, १५
अप्रतिग्रहेण, २, २
अप्सु, १५, १८, १७, ११; १८, १२
अब्भक्षणे, १८, ८
अभक्ष्यभक्षक., ४, १४
अभिजायते, १, ५
अभिभव·, १६, ४३
अभिमन्त्रितजलै, १५, ४
अभिमन्त्रितैः, १५, ४
अभिमानिनीः, १, १३
अभिवादकयो:, १७, ७
अभिवादने, १७, ४; १७, ५
अभिवादयेत्, १७, ८
अभिवाद्य, १७, ६; १७, ७
अभोजनम्; ११, १; १२, १८; १२, १९; १४, १
अभोज्यम्, ११, १६; १२, १३; १३, ९; १३, १२
अभ्यक्त, १२, १९
अभ्यक्तः, १६, १७
अभ्यङ्ग, १७, ११

अभ्यङ्गशिष्टं, ११, १५
अभ्यज्य, ९, ६
अभ्यसन्, २, १
अभ्यसन, २०, १०
अभ्यासे, ९, १३, ११, १७; १२, ७, १६, ९, १७, १३
अभ्युक्षणात्, १५, २
अभ्युक्ष्य, १५, ४
अमत्या, १५, १२, १८, ८
अमेध्य, ११, १८
अमेध्यगन्धाघ्राणे, १६, ३
अमेध्यपतने, १८, १
अम्बु, ७, १, १७, ६
अम्बुचारिणा, २, ११
अम्लोदकात्, १४, १९
अयं, १, २
अयाचिताशी, २, १
अयाज्ययाजकः, ४, २८
अयाज्याना, ५, २२
अयुतं, १९, १२
अरण्ये, ३, १५
अरिष्टदर्शनादौ, १६, ११
अर्क, १२, १७
अर्चिः, १, ११
अर्चिरादि, १, १४
अर्जनं, १६, २०
अर्धकृच्छ्रम्, १५, २३
अर्धप्रायश्चित्त, ७, ८
अर्धम्, ११, १९
अर्वाक्, १५, ८
अर्हति, १७, १
अर्हन्ति, ७, ५, २०, १; २०, ८
अलाबु, १४, २
अल्पजलाशये, ११, ३१
अल्पबलः, ४, २३
अवगाह्य, १५, ११
अवगोरणी, ४, २७
अवधूत, ११, १८
अवलिप्तस्य, १३, ११
अवलीढं, १०, ३
अवलोक्य, १६, ४८
अवशः, १५, १८
अवाप्नुयात्, २, १
अवाप्य, १, १३
अवि, २, ९; ६, ४
अविक्रेयविक्रयी, ४, ६०
अविधानेन, १, ५
अव्रतस्य, १४, १
अशुचिः, १२, २, १७, ८
अशुभं, १३, १३
अश्नन्, ४, ४३
अश्नीयात्, १०, १९, १४, ९
अश्म, ८, १२
अश्रद्दधानस्य, १३, ११
अश्व, ३, ३१
अश्व, ५, ३; १०, ११
अश्वत्थपर्णाना, १२, १७
अष्टमानं, १५, ३
अष्टमुष्टि, ८, २६
अष्टशतजपः, १५, २२

अष्टौ, ७, १४
असन्निहितजलदेशे, १५, १८
असंभाष्यैः, १८, ६
असगोत्रस्पर्शने, १८, २
असच्छास्त्राभिगमनम्, ५, ४१
असत्कार्यनिरतः, १, ७
असद्दोषसंकीर्तनः, ३, १२
असभ्यभाषणं, ६, ५
असृक्पाते, १५, १६
असौ, १, ९, १, १४
अस्तु, १५, ४
अस्थिमतां, ९, १५
अस्नात्वा, १६, १, १८, ५
अस्पृहैः, १, ११
अहं, ५, २
अहः, १, ११, १२, १४
अहर्निशम्, १०, १९
अहि, २, ११, ६, ४
अहुतं, ३, १४
अहोरात्रं, ११, २०
अहोरात्र, १२, १६
अहोरात्रम्, १२, ३

आ

आकरेषु, ५, ४२
आ कृष्णेन, १९, ६
आक्रोशकः, ४, ३, ४, २२
आचम्य, १२, ७
आचामेत्, १८, १३
आज्य, १७, ६
आढकं, १५, ३
आत्मचिन्तनं, २०, ११
आत्मज्ञ, १, ६
आत्मतत्त्वज्ञाननिष्ठ, २, २
आत्मनः, १७, २
आत्मनोऽर्थे, १०, ७
आत्मविक्रय., ५, ३५
आत्मानं, १३, २
आत्मार्थ, ५, २६
आदौ, २०, ११
आधाय, ८, १
आप्नुयात्, ६, १३, ७, १
आयसं, ७, ९
आयसाना, १४, २१
आरम्भी, १, ७
आराम, ५, २४
आरिष्ट, ७, २
आरोप्य, ९, ६
आरोहणम्, १६, २२
आर्जयन्ति, ८, १४
आर्द्र, ५, २९
आर्द्रवासा, ७, ९
आवर्तनम्, १४, १८
आविष्टः, १, ९
आवृत्तं, ५, ४६
आवृत्य, १९, १६
आशाकरः, १३, ८
आह, ९, ११
आहुः, १३, ५

इ

इक्षु, ५, ३४

इक्ष्वादि, ३, २८
इति, ५, २; ६, ३, ६, ६, ६, ७, ७, ९, ७, १०, ७, २०; ८, २६, ९, ६, ९, ११, १०, १२, ११, २०, १२, २५, १३, २, १३, ३, १३, ४, १३, ७, १५, ३, १५, ४; १६, ४९, १८, १४, १९, २, १९, ५; १९, ६, १९, ७, १९, १३, २०, १०, २०, ११
इद, ७, ९
इन्द्रचापं, १८, ११
इन्धन, ६, ६
इभ, ६, ४
इह, १, १०, १, १२, २, ३, ९, ११

ई

ईर्ष्यालु., ४, ३५

उ

उचिते, १३, ३
उच्चात्, १६, १८
उच्चै.स्वर, ३, २९
उच्छिष्टं, ११, ५; ११, ११
उच्छिष्ट, १७, ६
उच्छिष्टस्पर्शने, १८, ४
उच्छिष्टान्नभक्षणे, ११, १२
उच्छिष्टे, १२, २०
उच्यते, ६, ६, १०, १२; १२, २५
उत्तमः, २०, २
उत्तमवर्णाया, ६, २
उत्तरायण, १, ११
उत्थाने, १८, १०
उत्थित, ११, २१
उत्पादनम्, ५, १६
उत्पात, १६, ३२
उदकं, १८, २
उदकी, १४, १७
उदकुम्भ, ९, १
उदकेन, १४, १७
उदाहरन्ति, १२, २२, १९, १०
उदुम्बर, ७, ६
उद्धरेत्, १६, ४
उद्धृत्य, १५, ४
उन्मत्तौ, ४, ४
उपगच्छन्ति, ४, ६६
उपजीवनम्, ५, १८
उपतिष्ठेत्, ७, ९
उपनयनात्, १५, ८
उपनयेत्, ८, १३
उपपातकनाशनी, १९, ११
उपपातकम्, ५, ४४, ५, ४६
उपपातकानि, ५, ५
उपपातके, ५, ४५
उपवसेत्, १२, १४, १५, १९, १५, २०; १७, ३
उपवास, ११, २०, १२, १५, १२, १६, १४, ४, १४, ५; १५, १३; १५, २१; १६, १, १६, १०, १७, ४; १७, १२
उपवासेन, १२, ५, १२, ६
उपसर्पन्ति, २०, ३
उपस्पृशेत्, ११, ३; १७, १८

उपानह्यारोपितपाद, १७, ६
उपार्जितधन , २, २
उपासिता, १९, १
उपोषणं, ८, २३
उपोष्य, ९, ३ , १५, १७ , १६, ५ , १८, ११
उष्ट्रः, ३, १९
उष्ट्र, २, ९ , १३, १३
उष्ट्रयोनिं, २, ४
उष्ट्राणा, १६, २२

ऊ

ऊर्णा, ८, १२
ऊर्ध्वदेशे, ९, १९
ऊषरलवण, १४, २

ऋ

ऋचं वाच प्रपद्ये, १९, ७
ऋणाना, ५, ८ , ८, ११
ऋतं प्रपद्ये, १९, ७
ऋतुकालविषयम् , ८, १८
ऋतौ, १५, २३
ऋषि, ५, ९

ए

एक, ८, २१ ; ११, ५ , १२, १८
एकः, ११, २२
एकदेशजल, १२, १
एकपङ्क्तौ, १६, २
एकपङ्क्त्युपविष्टाना, ११, २२
एकपुरुषभारं, १४, २३
एकपुरुषोद्धरणभाराधिकं, १४, २२
एकपुरुषोद्वाह्यभाराधिकाना, १४, १३
एकादश, ७, २
एकादशगुणान् , १९, १६
एकादशसु, १४, १५
एकादशाना, १९, १४
एकादशावृत्तिकथनात् , १९, १७
एकाहम , ११, ९
एकेन, १४, ९
एकैकं, ५, ४४
एकोपवास , १४, ५
एतत् , ३, १३ , ६, ६ , ८, ६ ; ८, १८; १७, ७ , १७, १५
एतदन्न, १५, ४
एतदेव, ११, २
एतादृशैः, ४, ६६
एतानि, ६, ३
एतेषां, ४, ६६ , १३, ९
एवं, ५, ४७ ; ७, १० ; ९, ११ ; १५, ५ ; १५, १०
एव, १, १३ , २, १२ ; ४, ६६ ; ६, ९ , ६, १२ , ८, १९ , २०, ४
एवम् , १६, ६
एवमादिषु, १६, ४८

ऐ

ऐक्षवं, ७, २
ऐन्दवं, १२, १७
ऐन्दवम् , ८, ९

औ

औषधं, ५, ३३

क

कक्षवनदाही, ४, ४४
कथ्यते, ६, ७, ६, ८
कदम्ब, १२, १७
कदर्य., १३, २
कदर्यस्य, १३, १
कनीयस, ५, १२
कन्यादूषकः, ४, ३४
कन्यादूषणम्, ५, २५
कन्यादूषणे, १०, ६
कपाली, ४, १९
कम्बले, १६, ७
करनिर्मथितं, १०, १९
करभोदर, ४, २२
करोति, १३, ३; १५, १८
कर्पूरवर्जित, १४, २
कर्म, ६, ९; १३, १३; १७, १८
कर्मकृत्, १, ६
कर्मणा, ८, १४
कला, २०, १, २०, ८
कलिङ्गदेशान्, १७, १
कल्प्य, १९, १७
कश्चित्, ७, ६
कांस्यहारी, ३, ३०
कास्यादेः, १४, १८
कास्याना, १६, १३
काकः, ३, २२
काक, ९, १८
काकादिस्पृष्टे, १५, ४
काकोच्छिष्टं, ११, ५
काण., ४, १०
कामत, २, ८, ६, १७, ७, २, ८, १, ८, ४, ९, १, ९, १२, ९, १४, १२, ३, १२, ९
कामात्, ७, १२, ११, २६
कायकर्मभि, १, २
कारयित्वा, ९, ६
कारिता., १३, १३
कार्यम्, १२, १२
कार्येषु, १०, १२
काले, ५, ६; १३, ३
काषायद्रव्यक्रीडनम्, १६, ४६
काषायवस्त्रधारित्वम्, १६, ४५
किंचित्, ८, २५, ८, २६; ९, १४
कितव, १०, १३
कीट., १, १४
कीट, २, ६, २, १०
कीटघातनं, ६, ६
कीटविशेषः. ३, ११; ३, २३; ३, २९
कीर्तितः, १३, ७
कुक्कुट, १३, ५
कुक्कुटादीनाम्, १३, १
कुटीं, ६, ९
कुण्डाशी, ४, ८
कुनखिसस्पृष्टानि, ११, १८
कुनखी, ३, ३, १६, ४
कुमारी, ५, ४
कुमार्यालिङ्गनम्, १६, ३४
कुम्भी, १२, १७
कुम्भीफल, १४, २

कुरु, ११, २०

कुरुते, १०, ९, १२, २३

कुर्यात्, १०, ३, १४, १०, २०, ११

कुर्वन्, १७, ९, १७, १८

कुर्वीत, ६, १४

कुलक्षयकर, १५, २४

कुश, १७, ६

कुशोदकं, ७, ६

कुष्ठि, ११, १८

कुष्ठी, ४, १

कुसीदजीवन, ६, ५

कुसुम, ६, ६

कुसूलगर्भस्थं, १५, २

कूटकार, १०, १३

कूटसाक्षी, ४, २५

कूप, ११, २६

कूपवत्, ११, ३१

कूपस्थं, ११, २४

कूपादिषु, १२, ७

कूष्माण्डच्छेदनं, १५, २४

कृकलासादीनां, ९, १५

कृच्छ्र, ९, १४, ११, १८; ११, २३; १६, ४

कृच्छ्र, १५, १६

कृच्छ्रम्, ८, ८; १५, १४

कृच्छ्रेण, १०, १०

कृतं, ७, ९, ७, १२

कृत्वा, ६, ९; ७, १, ९, १८, १०, ८; १०, १३; १८, ४

कृमि:, १, १४; २, ६; २, १०; ४, ४६

कृमि, ६, ६

कृष्णपक्ष, १, १३

कृष्णल, ७, १८

कृष्णाजिने, २०, ९

कृष्यर्थ, ९, १७

कृसर, १२, १५

कृसराणा, १६, २३

केवल, १२, ९

केश, ८, १२, ११, ३; १५, १०

केसरि, ८, १२

कोटिगोदानात्, २०, ७

कोविदार, १२, १७

कौटिल्य, ५, २

कौमारदारत्यागी, ४, १२

कौशिकः, ४, २०

क्रतुविक्रयि, १३, १

क्रमेण, १०, १०

क्रव्याद, १६, ४२

क्रव्यादाना, २, १२

क्रियते, १२, १३

क्रियारम्भे, १०, ७

क्रीडनम्, १६, ४२

क्रूर, १३, १

क्रूरकर्मकृता, २, १२

क्रूरकर्मा, ४, १६

क्रूरकृत्, १, ८

क्लिन्न, ११, २४

क्षत्रिय, ९, ९

क्षत्रिय., ९, ९, ११, १३, ११, २७

क्षत्रिय, १७, ४

क्षत्रियागमने, ९, ३
क्षपणक., ४, १८
क्षयरोगादियुक्ता., ३, ५
क्षयरोगी, ३, १
क्षयी, ४, २१, ४, ५२
क्षान्ति, १, ११
क्षीरं, ३, २२
क्षीर, ८, १२
क्षीरपाने, ११, १
क्षीरहारी, ४, ५८
क्षीराणि, १५, ६
क्षीरे, १२, २०
क्षुत्वा, १८, १३

ख

खट्वादेः, १७, ३
खद्योत, ४, ४४
खर, ९, ६
खर, २, ५; २, ९; १३, १३; १५, ४, १६, २२
खरारोहणं, ९, १०
खलति., ४, ३
खानितेषु, १२, ७
खारी, १५, ३
खार्जूर, ७, २

ग

गच्छन्ति, १, १०
गजारोहणवृत्तिक, १०, ११
गण., १२, २५
गणान्न, १२, २१
गणान्नोपजीवि, १०, ११
गणिका, १२, २३
गणिकान्नं, १२, २१
गण्डमाली, ४, १४
गत्वा, ८, २७, १०, १८; १५, ११, १७, १
गन्ध, ८, १२
गन्धान्, ३, १७
गमन, ६, २
गमने, ८, ६, ९, १२
गरद, ४, ४, १०, ११
गर्दभः, ४, ६२
गर्भकरणे, ८, २८
गर्भान्, १२, २३
गर्भोत्पत्तौ, ९, ४
गर्हितेन, ८, १४
गलितं, १०, ३
गवाघ्रात, ११, ५
गवादिप्राणिहिंसनरूप, १३, १३
गव्यं, १२, २०
गा, ३, २६, १५, १८, १७, २
गानानि, १६, २४
गायक, १२, २१
गायत्र्यष्टसहस्र, १०, ९
गायत्रीशत, ९, १६
गायत्रीसहस्रं, १९, ८
गीत, १६, २४
गुड, १५, ७
गुणवतीगमने, ८, १७
गुरु, ४, ५

गुरुतल्पग॰, २, ७; २, १२, ३, ४, १९, १३
गुरुतल्पगामी, ८, १
गुरुतल्पसमं, ५, ४
गुरुतल्पसमे, ८, ४
गुरुशिष्ययो, १६, ९
